वर्षम्-९

ISSN : 975-2676

अङ्काः-३३

# संस्कृतवार्ता

## राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५२४२ वैक्रमाब्दः २०७३ आषाढ-शुक्लः ३ - आश्विन-कृष्णः ३० शकः १९३८ जुलाई २०१६ - सितम्बर २०१६

### कुलपतिवाक्

### "यद् भद्रं तन्न आसुव"

प्रतिदिनम् उदेति रविः। प्राच्यां दिशि इति अस्माकम् अनुभवः। पृथिवी सूर्यं परिभ्रमति। मर्त्या वयं सूर्योदयं सूर्यास्तं च कल्पयामः। दिनकरे समागते प्रकाशः प्रसरति, कमलं विकसति, पक्षिणः डयन्ते, सर्वे जीवाः जागृताः कार्ये प्रवर्तन्ते। सोऽयं जीवितविकारः विकासं प्रापयति।

मित्राणि! संस्कृतभास्करोदयः पुरतः दृश्यते। संस्कृतनिहितात् ज्ञानात् पराङ्मुखा बहवः अभिमुखास्सन्ति। वेदनिष्ठं शास्त्रैः उपबृंहितं ज्ञान-विज्ञानपुञ्जम् अवाप्तुं लोकाः प्रतीक्षन्ते। समग्रं विश्वं संस्कृतं जगत् समीक्षते। तदनुगुणं राष्ट्रियसंस्कृतसंस्थानस्य परिवारेण भावियोजनानीतयः समादृताः स्युः। **''काले खलु समारब्धाः फलं बध्नन्ति नीतयः''** इति कवेरुक्तिं स्मरामः। सोऽयं कालः समायातः। अस्मिन् मुहूर्ते विकासपराः नीतयः समाश्रयणीयाः। अस्मत्परिवारस्य प्रत्येकमपि सदस्यः अभ्युदयोन्मुखकार्यस्य सन्धारणे क्रियान्वयने च कृतसङ्कल्पः प्रवर्तेत।

कार्यस्य सङ्कल्पमात्रेण किमपि न सिध्यति। समुचितकार्यस्य चयनं क्रियान्वयनं च महत्त्वपूर्णं भवति। राष्ट्रोपकारकम् अनन्यसाधारणं कर्म चित्वा अग्रेसरामः। सुविचार्य कृतं योजनाबद्धं कर्म निश्चयेन श्रेयसे भविता। किं पूर्वं किमनन्तरं करणीयमिति विविच्य प्रवर्तामहे। **''अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म''** इति कविवाणी प्रथते।

**''योऽनूचानः सनो महान्''** इति ध्येयवाक्यं स्मारं स्मारं सञ्चरेम। ऋषीणां निधिः-वेदः, वेदो-नाम ज्ञानं, शास्त्रोपबृंहितं विज्ञानञ्च वर्तते। ऋषीणां निरन्तरतपसा इदं ज्ञानं विज्ञानञ्च प्राप्तं विद्यते। तद्रक्षणाय विस्ताराय च शोधकार्यं प्रधानं विद्यते। नवनवोन्मेषशालिनीं बुद्धिं दधानाः युवानः प्राचीनम् आधुनिकं विज्ञानं संयोज्य नवनवीनम् आविष्कारं कुर्युः। ज्ञानविज्ञानसम्पदा समग्रं विश्वमुन्नेतुं प्रयतेरन्। अनुचितमधुना स्वपनम् ॥ जागरेण किमपि साधयेम।

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत्त्वं पूषन् अपावृणु सत्यधर्माय दृष्टये।।**

इति प्रार्थनया संस्कृतवार्तायाः सम्पादकवृन्दाय मङ्गलमाशंसे।

*-परमेश्वरनारायणशास्त्री*



श्रीप्रकाशजावडेकरवर्यं सम्मानयन् कुलपतिवर्यः



संस्कृतसप्ताहोत्सवोद्घाटनावसरे सम्बोधयन्ति श्रीप्रकाशजावडेकरवर्याः




स्वागतभाषणं विदधानः कुलपतिवर्यः

### मुख्यपरामर्शदाता

प्रो. परमेश्वरनारायणशास्त्री

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

### परामर्शदातृमण्डलम्

प्रो. सुब्रह्मण्यशर्मा

प्रो. मनोजकुमारमिश्रः

### सम्पादकः

डा. मधुकेश्वरभट्टः


'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायं, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

संस्थानस्य जालपुटेऽपि संस्कृतवार्ता दृष्टुं शक्यते-
**www.sanskrit.nic.in**


**संस्कृतवार्ता**

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

**ISSN : 975-2676**

प्रकाशकः

कुलसचिवः

**राष्ट्रियसंस्कृतसंस्थानम्**

(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः, भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,

नवदेहली-110058

011-28524993, 28521994, 28520977

email : sanskrit.registrar@gmail.com

website : www.sanskrit.nic.in


## प्रतिस्पन्दः




राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकी वार्तापत्रिका संस्कृतवार्ता पुनः प्राकाश्यं नीता इति विदित्वा सन्तोषम् अनुभवामि। संस्थानस्य परिसराणाञ्च कार्यकलापान् बिभ्रती इयं पत्रिका संस्कृतजगन्मार्गदर्शिनी इवास्ति।

-पवनः, राजस्थानम्

## विश्वविद्यालयानुदानायोगसमित्या संस्थानस्य निरीक्षणम्

विश्वविद्यालयानुदानायोगेन राष्ट्रियसंस्कृतसंस्थानस्य निरीक्षणार्थम् एका समितिः आरचिता। अनया समित्या २८.०७.२०१६ दिनाङ्कतः ३०.०७.२०१६ दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये निरीक्षणं विहितम्। अस्याः समितेः गुजरातराज्यस्य अहमदाबाद-नगरस्थ-डॉ. बाबासाहेब अम्बेडकरविश्वविद्यालयस्य कुलपतिः प्रो. पङ्कजजानिमहाभागः अध्यक्षः आसीत्।

नागपुरस्थ-कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलपतिः डॉ. उमा वैद्यामहाभागा, पूनास्थ-सावित्रीबाई फुले पूनाविश्वविद्यालयस्य उच्चसंस्कृताध्ययन-केन्द्रस्य प्रो. रवीन्द्र अम्बादास मुलेमहाभागः, बनारसहिन्दूविश्वविद्यालयस्य प्रो. उमाशङ्करशुक्लमहाभागः, गुवाहाटिविश्वविद्यालयस्य संस्कृतविभागस्य प्रो. मञ्जुलादेवी-महाभागा, कर्णाटकराज्यस्थ-रानी-चेन्नम्मा-विश्वविद्यालयस्य शिक्षाविभागस्य डॉ. पूर्णिमा पट्टणशेट्टिमहाभागा, विश्वविद्यालयानुदानायोगस्य संयुक्त-सचिवा डॉ. उर्मिला देवीमहाभागा च सदस्याः आसन्। समितिरियं मुख्यालयस्य मुक्तस्वाध्यायपीठ-परीक्षावित्तादिविविधविभागस्य निरीक्षणम् अकरोत्। अपि च समितिः अग्रिमेषु मासेषु राष्ट्रियसंस्कृतसंस्थानस्य विविधपरिसराणां निरीक्षणमपि विधास्यति।









विश्वविद्यालयानुदानायोगसमितेः संस्थानस्य निरीक्षणस्य कानिचन दृश्यानि

# ससन्तोषं समाचरितः संस्कृतसप्ताहमहोत्सवः



संस्कृतसप्ताहोत्सवोद्घाटनस्य एकं दृश्यम्

राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये ऐषमः संस्कृतसप्ताहमहोत्सवः १७.०८.२०१६ तः २२.०८.२०१६ दिनाङ्कं यावत् समायोजितः। संस्कृतसप्ताहाङ्गतया नैके कार्यक्रमाः सम्पन्नाः। इमे कार्यक्रमाः ज्ञानशेवधेः संस्कृतभाषायाः प्रसारे प्रचारे विकासे च नूनमेव उपयोगिनो भविष्यन्ति।

१७.०८.२०१६ दिनाङ्के संस्कृतसप्ताहमहोत्सवस्य उद्घाटनसमारोहः नवदेहलीस्थे राष्ट्रियसंग्रहालयस्य प्रेक्षागृहे मानवसंसाधनविकासमन्त्रालयः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, दिल्लीविश्वविद्यालयस्य संस्कृतविभागः, जवाहरलालनेहरुविश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रम्, गोस्वामिगिरिधारीलालप्राच्यविद्याप्रतिष्ठानम्, दिल्लीसंस्कृतअकादमी, राष्ट्रियशैक्षिक-अनुसन्धान-प्रशिक्षणपरिषदः संस्कृतविभागः, देववाणीपरिषद्, अखिलभारतीयसंस्कृतप्रकाशकसंघः, अखिलभारतीयपत्रकारसंघः, दिल्लीसंस्कृतशिक्षकसंघः, संस्कृतसंवर्धनप्रतिष्ठानम्, संस्कृतभारती इति चतुर्दश-संस्थानां संयुक्ततत्त्वावधाने संपन्नः। भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य माननीयमन्त्रिणः श्री प्रकाशजावडेकरमहोदयाः संस्कृतसप्ताहमहोत्सवं दीपप्रज्वालनपुरस्सरं समुदजीघटन्। अवसरेस्मिन् संस्कृतभाषाविषये सम्माननं प्रकटयन्तः माननीयाः मन्त्रिणः श्री प्रकाशजावडेकरमहाभागाः सर्वाः अपि भारतीयभाषाः प्रीतिं वितरन्ति, किन्तु संस्कृतेः मूर्तस्वरूपा संस्कृतभाषा समस्तभारतीयभाषाणां कृते प्राणान् प्रददाति। अपि च संस्कृतभाषायाः उन्नतये संसदि समस्तसदस्याः ऐकमत्यं प्रकटयन्ति न कदापि विरोधं कुर्वन्ति इति अवदन्। सन्दर्भे अस्मिन् संस्कृतभाषाविकासाय प्रचाराय च परिश्रमं विदधानाः डॉ. चन्द्रगुप्तवर्णेकरमहोदयाः, प्रो. बि.महादेवन्-महोदयाः, डॉ. धवलकुमारपटेल (आई.ए.एस्.) महाभागाः च विशिष्टसेवाव्रतिसम्मानेन सभाजिताः। कार्यक्रमेस्मिन् मानवसंसाधनविकासमन्त्रालयस्य संयुक्तसचिवः डॉ. सुखबीरसिंहसन्धू-महाभागः, राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठस्य कुलपतिः प्रो.रमेशकुमारपाण्डेयः च अधिमञ्चं व्यभूषयत्। अपि च राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिक्याः वार्तापत्रिकायाः संस्कृतवार्तायाः उन्मोचनं मन्त्रिवर्यः अकरोत्। एवम् अस्मिन् दिने संस्कृतसप्ताहोत्सवमुपलक्ष्य विद्यालयस्तरीयच्छात्राणां कृते रक्षाबन्धनम् इति विषये महाविद्यालयस्तरीयच्छात्राणां कृते विश्वशान्त्यै संस्कृतस्य योगदानम् इति विषये च निबन्धलेखनस्पर्धा समायोजिता। स्पर्धायामस्यां छात्राः सोत्साहं भागम् ऊढवन्तः।




संस्कृतवार्तायाः लोकार्पणं विदधानः श्रीप्रकाशजावडेकरवर्यः



संस्कृतसप्ताहोत्सवाङ्गतया आयोजितायां स्पर्धायां तल्लीनाः छात्राः

१९.०८.२०१६ दिनाङ्के विद्यालयस्तरीयच्छात्राणां कृते संस्कृतिः संस्कृताश्रिता इति विषये महाविद्यालयस्तरीयच्छात्राणां कृते अनेकतासु एकतासंपादकं संस्कृतम् इति विषये च भाषणस्पर्धा समायोजिता। स्पर्धायां दिल्लीस्थ-विद्यालयस्य महाविद्यालयस्य च छात्राः भागं गृहीतवन्तः।

२०.०८.२०१६ दिनाङ्के स्तोत्रकण्ठपाठस्पर्धायां निर्धारितदेव्यपराधक्षमापणस्तोत्रमाधारीकृत्य महाविद्यालयीयच्छात्राः, गणेशपञ्चरत्नस्तोत्रमाधारीकृत्य विद्यालयीयच्छात्राः स्तोत्रपाठम् अकार्षुः। २१.०८.२०१६ दिनाङ्के छात्राणां कृते स्वरचितसंस्कृतकवितापाठनस्पर्धा समायोजिता। स्पर्धायामस्यां छात्राः राजनीतिः, पर्यावरणं, विज्ञानम् इत्यादिविषयमाश्रित्य संस्कृतकवितां श्रावितवन्तः।




संस्कृतसप्ताहोत्सवस्य समापनसमारोहे मञ्चासीनाः अतिथयः

२२.०८.२०१६ दिनाङ्के संस्कृतसप्ताहमहोत्सवस्य समापनसमारोहः राष्ट्रियसंस्कृत-संस्थानस्य प्राङ्गणे सम्पन्नः। कार्यक्रमे अध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः, विशिष्टातिथिपदं नवदेहलीस्थ-केन्द्रीयविद्यालयसंघटनस्य प्रशिक्षणविभागस्य संयुक्त-आयक्तः डॉ. शचिकान्तमहोदयः, राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचरः प्रो.रामकरणशर्ममहाभागः मुख्यातिथिपदं च समलमकरोत्। संस्कृतभाषा मानव-

संस्कृतसप्ताहः


सभां सम्बोधयन् आचार्यः रामकरणशर्मा


पुरस्कारं वितरन्तः अतिथयः


कुलपतिभिः सह पुरस्कारभाजः छात्राः

हृदयस्य प्रथमभाषा विद्यते। संस्कृतं विश्वस्य एतादृशी भाषा विद्यते यत् परिष्कृता परिशुद्धा च। संस्कृतस्य वैदेशिकः विद्वान् मेक्समुलरः ईदृशः प्रभावितः आसीत् सः मरणात् पूर्वं संस्कृतभाषायां मोक्षमुल्लरः इति नामपरिवर्तनमपि अकरोत्। भारतस्य इतिहासे संस्कृतं यादृशं स्थानम् अलङ्कृतमासीत् तत्स्थाने पुनः प्रतिष्ठापनाय प्रयासः विधेयः इति डॉ. शचिकान्तमहोदयः अवदत्। वैदेशिकाः संस्कृतविद्वांसोपि संस्कृतं पठित्वा अत्यन्तं प्रभाविताः सन्ति। ते संस्कृतस्य महान्तं वैयाकरणं पाणिनिं गुरुरूपेण आमनन्ति इति प्रो. रामकरणशर्ममहाभागः अबोधयत्। सरस्वती नदी यथा सुप्तरूपेण अस्ति तथा छात्रेषु सुप्ता विद्यारूपा सरस्वती अमुं देशं रक्षति उन्नतस्तरे नयति च इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वनारायणशास्त्रिमहोदयः अवदत्। एवं स्पर्धासु विजेतृभ्यः छात्रेभ्यः पुरस्कारं च व्यतरन्।

## विशिष्टव्याख्यानम्

०५.०९.२०१६ दिनाङ्के शिक्षकदिवसमुपलक्ष्य मुक्तस्वाध्यायपीठेन संस्कृतसंवर्धनप्रतिष्ठानस्य अध्यक्षस्य डॉ. चान्दकिरणसलुजा-महोदयस्य दूरस्थशिक्षायाम् अध्यापकस्य भूमिका इति विषये विशिष्टव्याख्यानं समायोजि। कार्यक्रमे श्रीलालबहादुरशास्त्रिसंस्कृतविद्यापीठस्य कुलपतिः प्रो. रमेशकुमारपाण्डेयवर्यः मुख्यातिथिपदम् मुक्तस्वाध्यायपीठस्य निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः अध्यक्षपदं च अलमकार्षीत्। यः सर्वदा शिष्यस्य हितचिन्तनं तस्य जीवने परिवर्तनं च करोति सः उत्तमः शिक्षकः इति श्रीलालबहादुरशास्त्रिसंस्कृतविद्यापीठस्य कुलपतिः प्रो. रमेशकुमारपाण्डेयवर्यः अवदत्। संस्कृतभाषा सर्वभाषा जननी विद्यते, नासा अपि इमां भाषामादाय कार्यं कुर्वन् अस्ति। मुक्तस्वाध्याये अध्यापकस्य छात्रस्य च शरीरेण दूरता अस्ति चेदपि मानसिकरूपेण छात्रः अध्यापकस्य समीपे भवति। अतः पाठलेखनकाले अध्यापकेन छात्रस्तरानुगुणं पाठस्य लेखनं कर्तव्यं भवति इति डॉ.चान्दकिरणसलुजामहोदयः विशिष्टव्याख्याने अबोधयत्। ईदृशं व्याख्यानं मुक्तस्वाध्यायपीठस्य पाठलेखककानाम् अत्यन्तम् उपकारकं विद्यते अतः पुनः एतादृशं व्याख्यानम् आयोज्यते इति कार्यक्रमस्य अध्यक्षः मुक्तस्वाध्यायपीठस्य निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः अवदत्। अवसरे अस्मिन् दूरस्थशिक्षायाः प्राक्शास्त्रिशास्त्र्याचार्यकक्षायाः पाठ्यविषयकाः रसगङ्गाधरवैयाकरणसिद्धान्तकौमुदीलघुसिद्धान्तकौमुदीकेशवीयजातकपद्धतिग्रन्थाः लोकार्पिताः।

## पुस्तकानां लोकार्पणम्

बैङ्काक्-नगरे प्रवृत्ते विश्वसंस्कृतसम्मेलने भारतस्य पाश्चात्त्यस्य च विद्वद्भिः समुपस्थापितशोधलेखानां संग्रहरूपाणां पुस्तकानां लोकार्पणं ०८.०९.२०१६ दिनाङ्के राष्ट्रिय- संस्कृतसंस्थानस्य मुख्यालये संपन्नम्। अस्मिन् सन्दर्भे बैङ्काक्-देशस्य विद्वान् डॉ. चिरपात् प्रपण्डविद्यमहाभागः, लोङ्गलुकमहाभागा, साञ्चि-विश्वविद्यालयस्य कुलपतिचरी प्रो. शशिप्रभामहाभागा, लोचनमहाभागः, राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः च आसीत्।





पुस्तकलोकार्पणस्य कानिचन दृश्यानि

## समाचरितः सप्ततितमः स्वतन्त्रतादिवसः

१५.०८.२०१६ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये ७०तमः स्वतन्त्रतादिवसः समाचरितः। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः ध्वजोत्तोलनं विधाय देशस्य प्रगतिः यूनां हस्ते विद्यते। अतः युवानः सच्चारित्र्ययुक्ताः सन्तः देशं प्रोन्नतिपथे नयेयुः इति संदेशं प्रादात्। सन्दर्भेस्मिन् संस्थानस्य कुलसचिवः, आचार्याः अध्यापकाः, कर्मचारिणश्च उपस्थिता आसन्। एवं सप्ततितमं स्वतन्त्रतादिवसमुपलक्ष्य भाषणस्पर्धा-गानस्पर्धादयः नैके कार्यक्रमाः अनुष्ठिताः।



स्वतन्त्रतादिवसे सम्बोधयन् कुलपतिवर्यः

## समायोजितः हिन्दीपखवाडाकार्यक्रमः

१४.०९.२०१६ दिनाङ्के हिन्दीपखवाडाकार्यक्रमस्य शुभारम्भः जातः। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः दीपं प्रज्वलय्य कार्यक्रमस्य उद्घाटनं व्यधात्। हिन्दीभाषा अत्यन्तं मधुराभाषा विद्यते। तत्रत्यं साहित्यं गभीरम् अस्ति। या कापि भाषा तद्गतसाहित्येनैव जीवति इति समबोधयन्। सन्दर्भेस्मिन् मुक्तस्वाध्यायपीठस्य निदेशकः प्रो.रमाकान्तपाण्डेयवर्यः, शोधप्रकाशनविभागस्य अध्यक्षः तथा च हिन्दीपखवाडाकार्यक्रमस्य संयोजकः प्रो. मनोजकुमारमिश्रः, परीक्षानियन्त्रकः प्रो. सुकान्तसेनापतिवर्यः च उपस्थिताः आसन्। हिन्दीपखवाडामुपलक्ष्य संस्थानस्य कार्यालयकर्मचारिणां कृते नैकाः स्पर्धाः समायोजिताः।







हिन्दीपखवाडाकार्यक्रमोद्घाटनस्य दृश्यानि

## सम्पन्नाः मुक्तस्वाध्यायपीठस्य सम्पर्ककक्षाः

१५.०९.२०१६ तः २९.०९.२०१६ पर्यन्तम् राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठस्य सम्पर्ककक्षाः सम्पन्नाः। तत्र प्राक्शास्त्रि-शास्त्रि-आचार्यकक्षासु अधीयानानां छात्राणां कृते सम्पर्ककक्षाः आयोजिताः। तत्र ७५ छात्राः भागं गृहीतवन्तः। अस्मिन् सन्दर्भे छात्राणां कृते संस्कृतसम्भाषण-शिविरस्यापि आयोजनं विहितम्।

## भविष्यति नवमः अन्तःपरिसरीययुवमहोत्सवः

छात्राणां सर्वाङ्गीणाभिवृद्धिं कामयमानेन राष्ट्रियसंस्कृत-संस्थानेन प्रतिवर्षम् अन्तःपरिसरीययुवमहोत्सवः समायोज्यते। तदनु ऐषमः नवमः अन्तःपरिसरीययुवमहोत्सवः राष्ट्रियसंस्कृत-संस्थानस्य त्रिपुराराज्यस्य अगरतलाप्रदेशे विराजमाने एकलव्य-परिसरे १८.११.२०१६ तः २१.११.२०१६ पर्यन्तं समाचरिष्यते। अस्मिन् महोत्सवे परिसराणां ६०० अधिकाः छात्राः तेषां मार्गदर्शकाः निर्णायकाश्च सम्मिलिता भविष्यन्ति।

## अग्रिममासत्रये सम्पत्स्यमानाः कार्यक्रमाः

- **स्वच्छतासप्ताहः** – १-७ अक्तूबर २०१६
- **स्थापनादिवसः** – १५ अक्तूबर २०१६
- **सतर्कतासप्ताहः राष्ट्रिय-एकतादिवसः च** (सरदार पटेल जयन्ती) – ३१ अक्तूबर तः ६ नवम्बर, २०१६
- **राष्ट्रिय-शिक्षादिवसः** (मौलाना आजाद जन्मदिवसः) – ११ नवम्बर, २०१६
- **युवमहोत्सवः** – १८-२१ नवम्बर २०१६
- **सत्रार्द्धपरीक्षाः** (प्रथमः, तृतीयः, पञ्चमः) – ८-२२ दिसम्बर २०१६
- **सुशासनदिवसः** – २५ दिसम्बर, २०१६
- **अखिलभारतीयशास्त्रीयस्पर्धाः** – २८-३१ दिसम्बर २०१६

## कुलपतिदैनन्दिनी



०२.०७.२०१६ दिनाङ्के पार्लिमेंट्री स्टेण्डिङ्ग कमिटी, मानवसंसाधनविकासमन्त्रालय: भारतसर्वकार: इत्याख्येन दलेन भोपालपरिसरस्य निरीक्षणावसरे तत्र उपस्थिति:।

२८.०७.२०१६ त: ३०.०७.२०१६ दिनाङ्कं यावत् राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा संस्थानस्य मुख्यालयस्य निरीक्षणावसरे उपस्थिति:।

०६.०८.२०१६ दिनाङ्के दिल्लीविश्वविद्यालये आयोजितायां संस्कृत अध्यापन हमार गौरव इति परिचर्चायाम् उपस्थिति:।

१६.०८.२०१६ त: २२.०८.२०१६ दिनाङ्कं यावत् संस्थानस्य मुख्यालये प्रवृत्ते संस्कृतसप्ताहोत्सवे समुपस्थिति:।

१९.०८.२०१६ दिनाङ्के नवदेहलीस्थे एन.आई.ई. परिसरे प्रवृत्तायां National seminar on Sanskrit in School इति संगोष्ठ्यां मुख्यातिथिरूपेण उपस्थिति:।

२१.०८.२०१६ Social and cultural research institution for contextual exchange इति विषये हैदराबादनगरे प्रवृत्तायां संगेष्ठ्यां मुख्यातिथित्वेन उपस्थिति:।

०५.०९.२०१६ पुरीस्थसदाशिवपरिसरस्य नवीनशैक्षिणकभवनस्य भूमिपूजावसरे उपस्थित:।

१०.०९.२०१६ दिनाङ्के जयपुरस्थ–वैदिक–शाम्लिसंघद्वारा आयोजितयां त्रिदिवसीय– राष्ट्रियसंगोष्ठ्याम् उपस्थिति:।

११.०९.२०१६ बेङ्गलूरुनगरे संपन्ने गुरुनमनकार्यक्रमे उपस्थिति:।

१४.०९.२०१६ दिनाङ्के मुख्यालये प्रवृत्ते हिन्दी पखवाड़ा कार्यक्रमे अध्यक्षत्वेन उपस्थिति:।

२८.०९.२०१६ दिनाङ्के दिल्लीस्थे जवाहरलालनेहरुविश्वविद्यालये Post Independence Indian literature and culture इति विषये प्रवृत्तायाम् अन्ताराष्ट्रिय– संगोष्ठ्यां विशेषातिथिरूपेण उपस्थिति:।

२८.०९.२०१६ त: ०७.१०.२०१६ दिनाङ्कं यावत् आयोजिताया: राष्ट्रियप्राकृतसंशोधन– संपादनकार्यशालाया: उद्घाटनकार्यक्रमे उपस्थिति:।

२९.०९.२०१६ दिनाङ्के देहलीस्थे जवाहरलालनेहरुस्टेडियं मध्ये आचार्याभिनवगुप्तस्य सहस्राब्दं निमित्तीकृत्य आयोजिते कार्यक्रमे उपस्थिति:।

## विदुषां कार्यकलापा:

**आचार्या: ए.पि.सच्चिदानन्दवर्या:** – ०५.०७.२०१६ दिनाङ्के प्रसन्नगणपतिदेवस्थानेरवीन्द्रनगरे शिवमोग्गायां देवस्थानस्य रजतमहोत्सववर्षे श्रीस्वर्णवल्लीसंस्थानस्य श्रीचरणानां दिव्यसन्निधौ प्रसन्नगणपति अनुग्रह प्रशस्त्या सम्मानिता:। ०७.०८.२०१६ दिनाङ्के हरिहरपुरे षोडशे श्रावणसंगीतोत्सवकार्यक्रमे मुख्यातिथित्वेन उपस्थाय अभ्यगतभाषणम् एते व्यधासिषु:। १८.०९.२०१६ दिनाङ्के संस्कारभारती–होसनगरम् सुरभारतीसभाया: संस्कृतपाठनारम्भकार्यक्रमे भाग: ग्रहीत:।

**डॉ. सूर्यनारायण भट्ट:** – अगस्टमासस्य २५, २६ दिनाङ्कयो: जन्माष्टमीवाक्यार्थसभायां तपोवने जिज्ञासाधिकरणमिति विषये वाक्यार्थं प्रास्तौत्। अगस्टमासस्य २९ दिनाङ्के श्री पूर्णप्रज्ञाविद्यापीठे बेङ्गलूरुनगरे संस्कृतोत्सवकार्यक्रमे मुख्याभ्यागतत्वेन भागग्रहणं कृत्वा विशिष्टं भाषणञ्च कृतवान्।

**डॉ. कृष्णानन्तपद्मनाभन्** – ५.०९.२०१६ त: १७.०९.२०१६ पर्यन्तं श्रृङ्गेरीस्थशारदापीठे महागणपतिवाक्यार्थसभायां भागं गृहीत्वा व्याकरणे च वाक्यार्थप्रस्तावम् अकरोत्। मैसूरुनगरस्थे अवधूतदत्तात्रेयपीठे शास्त्रसदसि भागग्रहणम् अकार्षीत्।

**प्रो. पि.इन्दिरा** – त्रिशूरनगरस्थदेवालये रामायणमधिकृत्य उपन्यास: कृत:। रामायणमाधारीकृत्य विविधेषु स्थलेषु देवालयेषु च उपन्यास: कृत:।

**डॉ. राजेशकुमारशुक्ल:** – २३.०७.२०१६ से ११.०८.२०१६ तक मुक्तस्वाध्यायपीठ नई दिल्ली द्वारा भोपाल परिसर में आयोजित राष्ट्रीय कार्यशाला में भागग्रहण।

**डॉ. गणेश ईश्वरभट्ट:** – शृङ्गेरीजगद्गुरूणां सन्निधौ सप्टेम्बरमासस्य ५ दिनाङ्कत् १७ दिनाङ्कपर्यन्तं प्रवृत्तायां महागणपतिवाक्यार्थसभायां भागम् अग्रहीत्। अगस्टमासस्य ३० दिनाङ्के मङ्गळूरुसमीपस्थे मैत्रेयीगुरुकुले आयोजितायां शास्त्रपारम्परिककक्षायां परीक्षकत्वेन भागग्रहणं कृतवान्। अगस्टमासस्य २, ३ दिनाङ्कयो: मैसूरुनगरस्थे गणपतिसच्चिदानन्दाश्रमे प्रवृत्तायां शास्त्रसभायां भागम् अग्रहीत्। जुलै–मासस्य २३ दिनाङ्कात् २५ दिनाङ्कपर्यन्तं मैसुरुनगरे वेदान्तभारतीद्वारा आयोजितायां वेदान्तशास्त्रसभायां भागम् अग्रहीत्। जून्–मासस्य २२ दिनाङ्कात् जुलैमासस्य १२ दिनाङ्कपर्यन्तं काशीहिन्दूविश्वविद्यालये प्रवत्ते पुनश्चर्यापाठ्यवर्गे भागम् अग्रहीत्।

**डॉ. राघवेन्द्रभट्ट:** – जून्–मासस्य २२ दिनाङ्कात् जुलैमासस्य १२ दिनाङ्कपर्यन्तं काशीहिन्दूविश्वविद्यालये प्रवृत्ते पुनश्चर्यापाठ्यवर्गे भागम् अग्रहीत्। के.आर्. नगरस्य वेदान्तभारत्यां जुलै मासस्य २४, २५ दिनाङ्कयो: वेदान्तचिन्तन– गोष्ठ्यां भागग्रहणं कृतवान्।

**डॉ. चन्द्रकान्तः** – ०८.०८.२०१६ दिनाङ्के तिरुपतिस्थसंस्कृतविद्यापीठे विद्यावारिधिवाक्परीक्षायाम् भागमग्रहीत्।

**डॉ. चन्द्रशेखरभट्टः** – अगस्ट्मासस्य २३ दिनाङ्के श्रीमातासंस्कृतमहापाठशालायां प्रवृत्ते संस्कृतोत्सवकार्यक्रमे मुख्याभ्यागतत्वेन भागग्रहणम् अकरोत्। ०५.०९.२०१६ तः १७.०९.२०१६ पर्यन्तं शृङ्गगिरिस्थशारदापीठे महागणपतिवाक्यार्थसभायां भागं गृहीत्वा व्याकरणे वाक्यार्थं प्रास्तौत्।

**डॉ. सि.एस्.एस्.एन्.मूर्तिः** – अद्वैतदत्तपीठे मैसूरुनगरे शास्त्रसदसि भागग्रहणम् अकरोत्। शारदापीठे महागणपतिवाक्यार्थसभायां भागं गृहीत्वा वाक्यार्थं प्रास्तौत्। अगस्ट् ३० दिनाङ्के अध्यापकवाक्यार्थपरिषदि परिसरे वाक्यार्थप्रस्तावं कृतवान्।

**प्रो. सुब्राय. वि. भट्टः** – जुलै २३ तः २५ पर्यन्तम् वेदान्तभारती मैसूरुमध्ये शास्त्रगोष्ठ्याम् भागग्रहणम् अकार्षीत्। श्रङ्गगिरिस्थे शारदापीठे महागणपतिवाक्यार्थसभायां भागग्रहणं कृत्वा मीमांसायां वाक्यार्थं प्रास्तौत्।

**प्रो. के.ई. मधुसूदन्** – शारदापीठे महागणपतिवाक्यार्थसभायां भागग्रहणं कृत्वा न्यायशास्त्रे वाक्यार्थं प्रास्तौत्।

**डॉ. वेङ्कटरमणभट्टः** – अगस्टमासस्य १९ दिनाङ्के शृङ्गगिरिस्थे अभिनवविद्यातीर्थमाध्यमिकविद्यालये संस्कृतोत्सवकार्यक्रमे मुख्याभ्यागतत्वेन उपस्थाय संस्कृतोत्सवभाषणं व्यधासीत्। अगस्टमासस्य २३ दिनाङ्के कोप्पामण्डलस्य सेन्ट् जोसेफ् प्रौढशालायां संस्कृतोत्सवमुपलक्ष्य व्याख्यानं कृतवान्। अगस्टमासस्य २३ तमे दिनाङ्के कोप्पानगरस्थे श्रीवेङ्कटेश्वरविद्यालये संस्कृतोत्सवे मुख्यवक्तृत्वेन भागमग्रहीत्।

**डॉ. प्रमोदभट्टः** – मैसूरुनगरे आषाढकृष्णचतुर्थीतः आषाढकृष्णषष्ठीपर्यन्तम् (२३.०७.२०१६ तः २५.०९.२०१६) 'वेदान्तभारती' पक्षतः प्रचालितायां वेदान्तशास्त्रचिन्तनगोष्ठ्यां भागं गृहीतवान्। आन्ध्रप्रदेशस्य विजयवाटिकायां भाद्रपदशुक्लषष्ठ्यां (०७.०९.२०१६) श्री काञ्ची वेदवेदान्तशास्त्रसभाद्वारा आयोजितायां व्याकरणशास्त्रीयपरीक्षायां व्याकरणशास्त्रे परीक्षां दत्त्वा "व्याकरणरत्नम्" इति उपाधिना पुरस्कृतः।

**प्रो. एम्. चन्द्रशेखरः** – संस्थानस्य मुम्बईपरिसरतः भोपालपरिसरस्य प्राचार्यरूपेण कार्यभारग्रहणम्।

**प्रो. भारतभूषणमिश्रः** – भोपालपरिसरे केन्द्रीयविद्यालयानां सेवाकालिकानां शिक्षकाणां प्रशिक्षणकार्यक्रमे विशेषदायित्वम्। संस्थानमुख्यालये अकादमिकपरिषदः उपवेशने सहभागिता। महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानस्य कटनीमैहरस्थानां पाठशालानां निरीक्षणम्। प्रो. मिश्रमहोदयस्य निर्देशने एकवर्षीयवास्तुशास्त्रपत्रोपधिपाठ्यक्रमस्य शुभारम्भः परिसरे जातः। सितम्बरमासस्य अन्तिमदिने स्वच्छताकार्यक्रमस्य निर्देशनं कृतम्।

**प्रो. प्रभादेवीचौधरी** – संस्थानमुख्यालाये अकादमिकपरिषदः उपवेशने सहभागिता। भोपालपरिसरे केन्द्रीयविद्यालयानां सेवाकालिकानां शिक्षकाणां प्रशिक्षणकार्यक्रमे एकस्मिन् सत्रे अध्यक्षपददायित्वम्।

**प्रो. हसंधरझा** – भारतीयफलितज्योतिषपरिचयपाठ्यक्रमस्य, वास्तुशास्त्रपरिचयपाठ्यक्रमस्य च समन्वयनम्। संस्थानमुख्यालये मुक्तस्वाध्यायपीठस्य ज्योतिषपाठ्यक्रमस्य समन्वयनम्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य स्क्रीनिंग-कम-एवेल्युएशन-समितेः सदस्याताग्रहणम्। तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य विद्यावारिधि-मौखिकपरीक्षायामध्यक्षता, विशिष्टव्याख्यानं च। अम्बिकापुरस्थ-सरगुजाविश्वविद्यालयस्य चयनसमितौ विषयविशेषज्ञरूपेण (ज्योतिष-शास्त्रम्) सहभागिता। भोपालस्थ-क्षेत्रीयशिक्षासंस्थानस्य संस्कृतशिक्षकचयनसमितौ उपस्थितिः। महर्षिसान्दीपनि-वेदविद्याप्रतिष्ठानस्य उज्जयिनीस्थ-पाठशालानां निरीक्षणम्। कामेश्वरसिंहदरभंगाविश्वविद्यालये विजिटिंग फेलो (ज्योतिषशास्त्रम्) पदेन आमन्त्रणम्।

**डॉ. नागेन्द्रनाथझा** – राष्ट्रियशैक्षिक-अनुसन्धानप्रशिक्षणपरिषदा संस्कृतसप्ताहावसरे संस्कृतशिक्षणसन्दर्भे आयोजितायां राष्ट्रियशोधसंगोष्ठ्यां 'संस्कृतशिक्षण के लिए प्रशिक्षण' इति विषयमङ्गीकृत्य सहभागिता।

**डॉ. श्रीगोविन्दपाण्डेयः** – संस्थानस्य एकलव्यपरिसरात् भोपालपरिसरस्य शिक्षाशास्त्रविभागे कार्यभारग्रहणम्। भोपालपरिसरे समायोजितस्य ७० स्वतन्त्रता पखवाड़ाकार्यक्रमस्य कुशलसंयोजनम्।

**डॉ. अर्चनादुबे** – संस्थानमुख्यालये अकादमिकपरिषदः उपवेशने सहभागिता। शास्त्रीयप्रतिष्ठापाठ्यक्रमस्य परिचयसम्बद्धे उपवेशने सहभागिता। भोपालपरिसरे आयोजितस्य हिन्दीपखवाड़ाकार्यक्रमस्य संयोजनम्।

**डॉ. अशोककुमार कछवाहः** – राजस्थानविश्वविद्यालये पुनश्चर्यापाठ्यक्रमे सहभागिता। भोपालपरिसरे केन्द्रीयविद्यालयानां सेवाकालिकानां शिक्षकाणां प्रशिक्षणकार्यक्रमे विद्वत्प्रवररूपेण (resource person) सहभागिता। परिसरीयवार्षिकसांस्कृतिकस्पर्धानां समन्वयनम्।

**डॉ. श्यामदेवमिश्रः** – भोपालपरिसरस्य संस्कृतसप्ताहसमारोहे संस्कृतभाषयाः महत्त्वमिति विषयमङ्गीकृत्य उद्बोधनम्।

**डॉ. प्रदीपकुमारपाण्डेयः** – छत्तीसगढ़स्य संस्कृतस्य सुनिश्चितविद्यालयानां पर्यवेक्षणम्।

**डॉ. कैलाशचन्द्रदाशः** – मध्यप्रदेशस्य संस्कृतविद्यालयानां पर्यवेक्षणम्।

**श्रीप्रतापः** – जैनदर्शनस्य शोधपत्रिकायाः जैनदर्शनमीमांसायाः सम्पादनं, लोकार्पणं च। पाणिनिसंस्कृतवैदिकविश्वविद्यालयेन आयोजिते भारतीयदर्शनविषयकशोधसंगोष्ठ्यां 'वर्तमानपरिप्रेक्ष्ये जैनसिद्धान्तानाम् उपादेयता' विषयं स्वीकृत्य प्रतिभागिता।

**डॉ. नितिनजैनः** – राष्ट्रियशैक्षिक-अनुसन्धानप्रशिक्षणपरिषदा संस्कृतसप्ताहावसरे संस्कृतशिक्षणसन्दर्भे आयोजिते राष्ट्रियशोधसंगोष्ठ्यां 'प्राथमिक स्तर पर संस्कृतशिक्षण के लिए संरचनात्मक प्रयोग' इति विषयमङ्गीकृत्य सहभागिता। भोपालपरिसरे केन्द्रीयविद्यालयानां सेवाकालिकानां शिक्षकाणां प्रशिक्षणकार्यक्रमे विद्वत्प्रवररूपेण सहभागिता।

**डॉ. डम्बरूधरपतिः** – राष्ट्रियशैक्षिक-अनुसन्धानप्रशिक्षणपरिषदा संस्कृतसप्ताहावसरे संस्कृतशिक्षणसन्दर्भे आयोजितायां राष्ट्रियशोधसंगोष्ठ्यां 'प्राथमिकस्तरीयपाठ्यक्रमे जीवनमूल्यानां विकासार्थं संस्कृतशिक्षणम्' इति विषयमङ्गीकृत्य सहभागिता। भोपालपरिसरे केन्द्रीयविद्यालयानां सेवाकालिकानां शिक्षकाणां प्रशिक्षणकार्यक्रमे विद्वत्प्रवररूपेण सहभागिता। केन्द्रीयशैक्षिकप्रौद्योगिकी-संस्थानद्वारा आयोजिते ई-पाठ्यवस्तुकार्यक्रमे विद्वत्प्रवररूपेण सहभागिता।

**डॉ. पङ्कजजैनः** – काशीहिन्दूविश्वविद्यालये वाराणसीस्थया सार्वभौमिकप्राच्यविद्यासंस्थया 'डॉ. महेन्द्रकुमार न्यायाचार्य स्मृतिपुरुस्कार, २०१६' इत्यनेन भूषितः। रोहिणीदिल्लीस्थ-पुष्प-वर्षायोग-समित्या आयोजितायां राष्ट्रियसंगोष्ठ्यां सहभागिता।

**डॉ. सञ्जयद्विवेदी** – मध्यप्रदेशस्य संस्कृतविभागेन आयोजिते 'आज़ादी ७०' कार्यक्रमे धारजनपदे सांस्कृतिकसंगीतमयी प्रस्तुतिः। वृंदावनीय-विश्वशान्तिसेवा चैरिटेबलट्रस्टद्वारा सङ्गीतक्षेत्रे अभिनवप्रयोगाय 'शान्ति-एकतापुरस्कारः (५१००० रुप्यकाणि, प्रशस्तिश्च)' इत्यनेन अलङ्कृतः।

**डॉ. अजयकुमारमिश्रः** – दिल्लीविश्वविद्यालयस्य विश्वविद्यालयानुदानायोगस्य च संयुक्ततत्त्वावधानेन आयोजितायां शोधसंगोष्ठ्यां सहभागिता। एच.एस्. महाविद्यालयेन, अहमदाबादसंस्कृतअकादमीद्वारा च संयुक्तरूपेण आयोजितायां शोधसंगोष्ठ्यां प्रो. अर्कनाथ-चौधरीवर्यस्य मुख्यातिथ्ये मुख्यवक्तृरूपेण सहभागिता। उत्तरप्रदेशीयसंस्कृतस्य विद्यालयानां पर्यवेक्षणम्।

**डॉ. नीलाभतिवारी** – सीहोरे शासकीयचन्द्रशेखरआज़ाद-स्नातकोत्तरमहाविद्यालये प्रमाणपत्रवितरणसमारोहे मुख्यातिथिरूपेण उपस्थितिः। परिसरीयायाः राष्ट्रियसंदर्भितशोधपत्रिकायाः शास्त्रमीमांसायाः सम्पादनं, लोकार्पणं च। भोपालस्थस्य महर्षिपतञ्जलिसंस्कृतसंस्थानस्य साधारणपरिषदि राज्यशासनेन सदस्यत्वेन नियुक्तः।

**डॉ. संगीतागुन्देचा** – प्रसिद्धरङ्गकर्मि-चलचित्रकलाकार-श्रीदिनेशठाकुरस्मृतेः आयोजिते कार्यक्रमे श्रीमकरन्द- पराञ्जतेमहाशयस्य अध्यक्षत्वे श्रीप्रयागशुक्लसानिध्ये व्याख्यानम्, अस्मिन्नेन कार्यक्रमे डॉ. गुन्देचाद्वारा संस्कृतनाटकहास्यचूडामणेः अनूदितसंस्करणस्य प्रस्तुतिः। नवदेहलीस्थस्य राष्ट्रियनाट्यविद्यालयस्य अन्ताराष्ट्रियनाट्यसमारोहे 'भारतरङ्गमहोत्सवे' स्क्रीनिंगसमितौ आमन्त्रिता सदस्या।

## आरब्धानि अनौपचारिकसंस्कृतशिक्षणकेन्द्राणि

संस्कृतभाषायाः प्रचारार्थं राष्ट्रियसंस्कृतसंस्थानेन अनौपचारिकसंस्कृतशिक्षणकेन्द्राणां सञ्चालनं क्रियते। अन्यक्षेत्रेषु कार्यं कुर्वाणानां संस्कृतभाषामध्येतुम् अभिरुचियुक्तानां जनानां कृते अनौपचारिकसंस्कृतशिक्षणम् प्रदास्यते।











अनौपचारिकसंस्कृतशिक्षणकेन्द्रोद्घाटनस्य कानिचन दृश्यानि

## विद्यावारिध्युपाधिभाजः छात्राः (जनवरी २०१६ तः सितम्बर २०१६ पर्यन्तम्)


| क्र.सं. | नाम | विभागः | विषयः |
|---|---|---|---|
| १. | सत्यदेवः | शिक्षाशास्त्रम् | हिमाचलप्रदेशस्य काङ्गडाजनपदस्य उच्चमाध्यमिकस्तरच्छात्राणां कारकाणमधिगमे रेखीयभिक्रमस्य प्रभावः |
| २. | श्रुतिः एच्. के. | अद्वैतवेदान्तः | दशोपनिषत्सूद्धृतानां दृष्टान्तानां विमर्शः |
| ३. | जयकृष्णपाठकः | शिक्षाशास्त्रम् | माध्यमिकविद्यालयीयच्छात्राणां बौद्धिकविकासे हितोपदेशस्थसुभाषितानाम् अनुदेशनात्मकप्रभावस्याध्ययनम् |
| ४. | सुनीता शर्मा | साहित्यम् | साहित्यदर्पणस्य रुचिराटीकायाः समीक्षात्मकमध्ययनम् |
| ५. | भाग्यलक्ष्मी. हेच्.एम्. | साहित्यम् | सौन्दर्यशास्त्रदिशा श्रीशङ्कराचार्यविरचितसौन्दर्यलहर्याः काव्यसौन्दर्यविवेचनम् |
| ६. | निधीष्. एम्.जी. | साहित्यम् | श्रीमद्भागवतस्य कृष्णपदीव्याख्यायाः चतुर्थस्कन्धस्य सम्पादनं पठनञ्च |
| ७. | चन्द्रकान्त शर्मा | व्याकरणम् | शैषिकान्ततद्धितप्रत्ययानां तत्वबोधिनीबृहच्छब्देन्दुशेखरयोः तुलनात्मकमध्ययनम् |
| ८. | महावीरप्रसादवर्मा | व्याकरणम् | भासनाटकेषु तद्धितान्तपदविमर्शः |
| ९. | प्रतिमा शर्मा | शिक्षाशास्त्रम् | राजस्थाने विशिष्टबालानां शिक्षाव्यवस्था-एकं विश्लेषणात्मकमध्ययनम् |
| १०. | रणजीत सिंह रघुवंशी | साहित्यम् | स्वातन्त्र्योत्तरकाले प्रणीतस्य सीताचरिताश्रितसंस्कृतसाहित्यस्य समीक्षात्मकमध्ययनम् |
| ११. | अनुसूया शर्मा | फलितज्योतिषम् | बृहत्संहितायाः ग्रहचाराध्यायानां समीक्षात्मकमध्ययनम् |
| १२. | सरिता शर्मा | साहित्यम् | पण्डितमनुदेवभट्टाचार्यप्रणीतस्य विशुद्धवैभवमहाकाव्यस्य समीक्षणम् |
| १३. | राजेश कुमार डेटानी | साहित्यम् | श्रीमता ओगेटीपरीक्षितशर्मणा प्रणीतस्य श्रीमत्प्रतापराणायनमहाकाव्यस्य काव्य-शास्त्रीयमनुशीलनम् |
| १४. | रुचि जैनः | साहित्यम् | महाकविश्रीवादीभसिंहविरचितयोः क्षत्रचूडामणिगद्यचिन्तामण्याख्ययोः साहित्यकृत्योः काव्यशास्त्रीयं परिशीलनम् |
| १५. | अशोक कुमार मीणा | सर्वदर्शनम् | योगसूत्रोपरि सदाशिवेन्द्रसरस्वती-आचार्यरामानन्दाभ्यां विरचितयोगसुधाकर-मणिप्रभाटीकयोः तुलनात्मकमध्ययनम् |
| १६. | सुदीप कुमार पाठकः | साहित्यम् | संस्कृतकाव्यशास्त्रपरम्परायां शृंगारप्रकाशनिरुपितदोषगुणालङ्काराणां समीक्षणम् |
| १७. | प्रतिभा शर्मा | साहित्यम् | आमेरजयपुरराज्ये प्रणीतेषु संस्कृतकाव्येषु लोकपरम्परावर्णनम् |
| १८. | गीता याजि | अद्वैतवेदान्तः | शारीरकसूत्रभाष्यस्थसांख्ययोगमतविमर्शस्य एकं विशिष्टमध्ययनम् |
| १९. | राघवेन्द्रः | ज्योतिषम् | भारतीयज्योतिश्शास्त्रे तुलनात्मकं समीक्षात्मकञ्चाध्ययनम् |
| २०. | कृष्ण के.वि. | साहित्यम् | प्रभाव्याख्यासंवलितायाः पञ्चरत्नकृतेः पाठसमीक्षात्मकं सम्पादनम् |
| २१. | कमला पति तिवारी | शिक्षाशास्त्रम् | संस्कृतशिक्षकाणाम् आधुनिकभाषाशिक्षकाणाञ्च शिक्षकाभिवृत्तिकार्यसन्तुष्ठ्योः तुलनात्मकम् अध्ययनम् |
| २२. | अतुल दत्तः | शिक्षाशास्त्रम् | माध्यमिकस्तरे संस्कृताध्यापकानां वृत्तिसंतृप्तौ सामाजिकसांस्कृतिककारकाणां प्रभावस्य विश्लेषणात्मकमध्ययनम् |
| २३. | हरिओम् | शिक्षाशास्त्रम् | भाषणपठनकौशलयोः परिष्काराय पाठ्येतरक्रियाकलापानां योगदानस्याध्ययनम् |
| २४. | सरस्वती आर्या | व्याकरणम् | व्याकरणमहाभाष्यान्तर्गतपरिभाषासूत्राणां व्याकरणमहाभाष्यटीकानामालोके समीक्षात्मकमध्ययनम् |
| २५. | प्रसादभट्टः | ज्योतिषम् | बृहज्जातकव्याख्ययोः रुद्रविवरणी-अपूर्वार्थप्रदर्शिकयोः तुलनात्मकमध्ययनम् |
| २६. | शशिकान्त द्विवेदी | शिक्षाशास्त्रम् | मुनित्रयनिरूपिताया भारतीयशिक्षायाः समीक्षात्मकमध्ययनम् |
| २७. | वन्दना द्विवेदी | साहित्यम् | क्षेमेन्द्रप्रतिपादितौचित्यप्रकारदृष्टया वेणीसंहारनाटकस्य समीक्षात्मकमध्ययनम् |
| २८. | जितेन्द्र थदानी | साहित्यम् | स्वातन्त्रयोत्तरकाले प्रणीतानां रामकथाश्रितमहाकाव्यानां समीक्षात्मकमध्ययनम् |
| २९. | मुकेश कुमारः | शिक्षाशास्त्रम् | कर्णाटकस्थकनिष्ठोनप्राच्यसंस्कृतपाठशालासु सेवारतानां शिक्षकाणां वृत्तिसन्तृप्तेः अध्ययनम् |


| | | | |
|---|---|---|---|
| ३०. | प्रमोद शुक्ल: | शिक्षाशास्त्रम् | संस्कृतभाषाधिगमे गीत-पद्य-सुभाषित-कथानां प्रभावपरिशीलनम् |
| ३१. | शशिभूषण सेनापति: | शिक्षाशास्त्रम् | उत्कलराज्ये माध्यमिकस्तरे अधीयानच्छात्राणां सर्जनात्मकशक्तेरध्ययनम् |
| ३२. | जितेन्द्र कुमार गौतम: | ज्योतिषम् | अमरसिंहविरचितस्य अमरभूषणग्रन्थस्य सम्पादनं समीक्षणञ्च |
| ३३. | अनिरुद्ध नारायण शुक्ल: | ज्योतिषम् | आधुनिकसन्दर्भे चन्द्रश्रृङ्गोन्नतिसमीक्षणम् |
| ३४. | विनायक भट्ट: | मीमांसा | भाट्टसम्मताधिकारविधिविमर्श: |
| ३५. | हर्षवर्धन चौधरी | व्याकरणम् | प्रौढमनोरमाबृहच्छब्देन्दुशेखरयो: "स्त्रीप्रत्ययकारकप्रकरणयो:" तुलनात्मकमध्ययनम् |
| ३६. | शशिकान्त रथ: | पुराणेतिहास: | श्रीमद्भागवताऽधारेण वैष्णवकवि-'भूपतिपण्डित' विरचित 'प्रेमञ्चामृता'ख्य-ग्रन्थस्य भक्तिशास्त्रीयसमीक्षणम् |
| ३७. | गणपति: | द्वैतवेदान्त: | श्रीमध्वाचार्यविरचिततन्त्रसारसंग्रहस्य व्याख्याया: श्रीवेङ्कटनरसिंहाचार्यविरचिताया: तन्त्रसारविवृते: सविमर्शं सम्पादनम् |
| ३८. | मनीष जुगरान: | शिक्षाशास्त्रम् | प्रमुखच्छन्दोऽलङ्काराधिगमे अभिक्रमिताध्ययनस्य प्रभाव: |
| ३९. | सुश्रीसंगीता दाश: | सांख्ययोग: | पुराणेषु सांख्यतत्त्वपरिशीलनम् |
| ४०. | सुमन: | साहित्यम् | रविधर्मीयटीकोपेतस्य कवरिहस्यस्य समीक्षात्मकं सम्पादनम् |
| ४१. | चिन्मय जैन: | शिक्षाशास्त्रम् | परम्परागताधुनिकशैक्षिकसंस्थासु अधीयनानां विद्यार्थिनां सर्जनात्मकचिन्तनस्य विद्यालयवातावरणसम्बद्धाभिवृतेश्च तुलनात्मकमध्ययनम् |
| ४२. | सत्यवान् पण्डा | अद्वैतवेदान्त: | स्कन्दपुराणन्तर्गतवैष्णवखण्डे अद्वैतवेदान्ततत्त्वस्य विश्लेषणात्मकमध्ययनम् |
| ४३. | अंकुश कुमार: | अद्वैतवेदान्त: | श्रीमन्नित्यानन्दचरणानुचरविरचिताया अपरोक्षानुभूतिव्याख्याया: समीक्षात्मकं सम्पादनम् |
| ४४. | उम्मेद सिंह: | साहित्यम् | डॉ. भास्कराचार्यत्रिपाठिन: साकेतसौरभमहाकाव्यस्य काव्यशास्त्रीयमध्ययनम् |
| ४५. | हेमन्त कुमार जोशी | साहित्यम् | डॉ. हरिनारायणदीक्षितप्रणीतस्य 'भारतमाता ब्रूते' इत्यस्य महाकाव्यस्य समीक्षात्मक-मध्ययनम् |
| ४६. | रोमा यादव: | शिक्षाशास्त्रम् | सूचनाया: अधिकारस्य विषये संस्कृताध्यापकानाम् अभिवृत्ते:, सामाजिक-जागृते:, अनुप्रयोगस्य च तुलनात्मकमध्ययनम् |
| ४७. | राहुल द्विवेदी | शिक्षाशास्त्रम् | राजस्थानप्रान्तस्थ-शिक्षाशास्त्रि (बी.एड्.) छात्राध्यापकानां छात्राध्यापिकानाञ्च सामाजिकार्थिकस्थिते: मूल्येषु प्रभावस्याध्ययनम् |
| ४८. | अभिषेक शर्मा | ज्यौतिषम् | समरसिंहविरचितस्य मनुष्यजातकस्य समीक्षात्मकं सम्पादनम् |
| ४९. | ज्ञानरञ्जन कर: | साहित्यम् | इन्द्रपतिकृत: अलङ्कारसमुद्गस्य समीक्षात्मकं सम्पादनम् |
| ५०. | देवाशिष दाश: | सर्वदर्शनम् | हेत्वाभासस्वरूपविमर्शे बलदेवी-विमलप्रभाटीकयो: तुलनात्मकमध्ययनम् |
| ५१. | जगदीश चन्द्र पाण्डेय: | व्याकरणम् | कारकप्रकरणस्य अभिक्रमितानुदेशनाधारितम् अध्ययनम् |
| ५२. | आदित्य नारायण दाश: | सर्वदर्शनम् | आचार्यमेधाव्रतविरचितदयानन्ददिग्विजयमहाकाव्ये दार्शनिकतत्त्वानुशीलनम् |
| ५३. | हनुमान सहाय माली | साहित्यम् | कादम्बर्या: भट्टमथुरानाथशास्त्रिविरचितचषकटीकाश्रीभानुचन्द्रगणि सिद्धचन्द्रगणि-कृतटीकयो: तुलनात्मकमध्ययनम् |
| ५४. | नरेन्द्र बि.एस्. | साहित्यम् | आचार्यरेवाप्रसादद्विवेदिभिरुक्तस्य काव्यतत्त्वस्य दण्डिभामहोक्तकाव्यतत्त्वेन सह तुलनात्मकमध्ययनम् |
| ५५. | मानस रञ्जन साहु: | सर्वदर्शनम् | ब्रह्मसूत्रशाङ्करभाष्ये शैक्षिकविधीनां सिद्धान्तानाञ्च समीक्षात्मकमध्ययनम् |
| ५६. | जिन्सी मोल्.एस्. | साहित्यम् | डॉ. भास्कराचार्यत्रिपाठिविरचितस्य साकेतसौरभामहाकाव्यस्य आचार्यरमेशचन्द्रशुक्ल-विरचितस्य सुगमरामायणमहाकाव्यस्य च तुलनात्मकमध्ययनम् |
| ५७. | हेमराज शर्मा | साहित्यम् | पञ्चमहाकाव्येषु कौटिलीयस्य अर्थशास्त्रस्य प्रभाव: |
| ५८. | संदीप शर्मा | साहित्यम् | कविवरहरिरामाचार्यप्रणीतस्य नाचिकेतकाव्यस्य काव्यशास्त्रीयमध्ययनम् |
| ५९. | कुमारी सारुल: | धर्मशास्त्रम् | प्रमुखस्मृतिग्रन्थेषु स्त्रीणामार्थिकस्थिते: समीक्षात्मकमध्ययनम् |

| | | | |
|---|---|---|---|
| ६०. | नवीन कुमार मिश्रः | व्याकरणम् | परिभाषेन्दुशेखरस्य प्रमुखपरिभाषाणां हर्षनाथमिश्रविरचितदुर्गाव्याख्यादृष्ट्या परिशीलनम् |
| ६१. | रोहिणी के | साहित्यम् | श्रीदयानन्दचरितमहाकाव्यस्य काव्यशास्त्रीयविमर्शः |
| ६२. | मालिनी पि. | व्याकरणम् | शब्दतत्त्वविचारः उपनिषत्सु |
| ६३. | गोपाल नागेश भट्टः | साहित्यम् | साहित्यमीमांसा-अलङ्कारसर्वस्वयोः तुलनात्मकमध्ययनम् |
| ६४. | राधानाथ दिश्री | साहित्यम् | भवभूतिरुपकेषु सामाजिकतायाः समीक्षणम् |
| ६५. | रामविहारी झा | व्याकरणम् | यास्ककृतनिरुक्तस्य प्रपन्नालोकाख्यटीकायाः व्याकरणदृशा समीक्षणम् |
| ६६. | विशम्भर मीणा | धर्मशास्त्रम् | यज्ञेश्वरविरचितस्य कालनिर्णयस्य समीक्षात्मकमध्ययनम् |
| ६७. | समरेन्द्र नारायण पण्डा | सर्वदर्शनम् | वात्स्यायनप्रशस्तपादभाष्ययोः तुलनात्मकमध्ययनम् |
| ६८. | एल्. सुधीन्द्रः | नव्यन्यायः | पक्षधरमिश्रकृतस्य तत्त्वचिन्तामण्यालोकस्य विमर्शात्मकं सम्पादनम् अध्ययनं च |
| ६९. | प्रवीण कुमार जैनः | जैनदर्शनम् | जैनदर्शने त्रैलोक्यविषयकधारणायाः समीक्षात्मकं तुलनात्मकं वाऽध्ययनम् |
| ७०. | ज्योति गुप्ता | व्याकरणम् | शब्दशास्त्रालोके न्यायमीमांसयोः प्रतिपादितानां भाषासिद्धान्तानां समीक्षात्मकमध्ययनम् |

## राष्ट्रियसंस्कृतसंस्थानस्य नवप्रकाशितग्रन्थाः


| | | | |
|---|---|---|---|
| १. | **दारिद्र्यशतकम्** | सम्पादकः – डॉ. ई. राजारामहजारीपाठक | मूल्यम् : १५०.०० |
| २. | **स्तुति-कुसुमाञ्जलिः** | सम्पादकः – डॉ. रमाकान्तशुक्लः | मूल्यम् : ३८३.०० |
| ३. | **सृजति शङ्खनादं किल कविता** | सम्पादकः – प्रो. विन्ध्येश्वरीप्रसादमिश्रः | मूल्यम् : २७०.०० |
| ४. | **व्युत्पत्तिवादपरिष्कारः** | सम्पादकः – डॉ. एन.आर्. कण्णन् | मूल्यम् : १८६.०० |
| ५. | **श्रीमद्भगवद्गीता** – आनन्दवर्धनविरचितया ज्ञानकर्मसमुच्चयाख्यया व्याख्यया समलंकृता | | मूल्यम् : १६४.०० |
| ६. | **भारतभूप्रशस्तिः** | लेखकः – वाचस्पति भुवनेश्वरकरशर्मा | मूल्यम् : ९०.०० |
| ७. | **परमानन्दशास्त्रिरचनावलिः** | सम्पादकः – प्रो. सत्यप्रकाशशर्मा | मूल्यम् : ७२०.०० |
| ८. | **अभिराजदण्डकम्** | लेखकः – प्रो. अभिराजराजेन्द्रमिश्रः | मूल्यम् : १३०.०० |
| ९. | **Sanskrit Foundation of Indian Management Ethics** | | मूल्यम् : १६०.०० |
| १०. | **णेरणौसूत्रव्याख्यानानि** | सम्पादकः – डॉ. एस.पी.एल. आञ्जनेयशर्मा | मूल्यम् : ४६०.०० |
| ११. | **वेदामृतबिन्दवः** | सम्पादिका – प्रो. शशिप्रभाकुमारः | मूल्यम् : २५०.०० |
| १२. | **अद्वैतरत्नरक्षणम्** | सम्पादिका – डॉ. आनन्दमयीमहेन्द्रमालू | मूल्यम् : ४९०.०० |
| १३. | **स्तुति-कुसुमाञ्जलिः** | सम्पादकः – डॉ. रमाकान्तशुक्लः | मूल्यम् : ३८३.०० |
| १४. | **पालि भाषा और व्याकरण के विविध आयाम** | सम्पादकः – अजय कुमार सिंहः | मूल्यम् : १०८.०० |
| १५. | **संस्कृत-विमर्शः ( अङ्कः १० )** | प्रधानसम्पादकः – प्रो. परमेश्वरनारायणशास्त्री | मूल्यम् : ५०.०० |
| १६. | **पालि शास्त्र और बौद्ध दर्शन** | सम्पादकः – प्रो. संघसेनसिंहः | मूल्यम् : २१०.०० |

























शोभायात्रायाः किञ्चन दृश्यम्

# एकलव्यपरिसरवृत्तान्तः

## स्वातन्त्र्योत्सवपक्षः

भारतसर्वकारस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य निर्देशानुसारेण एकलव्यपरिसरे अगस्त-मासस्य ९ दिनाङ्कादारभ्य २३ दिनाङ्कं यावत्, स्वातन्त्र्योत्सवपक्षः महता उत्साहेन समाचरितः। उत्सवाङ्गतया छात्रेभ्यः भाषण-नृत्य-गीत-नाटकादिबहवः प्रतियोगिताः परिसरपक्षतः समायोजिताः। १५ दिनाङ्के प्रातः ५ वादने परिसरात् जगन्नाथमन्दिरं यावत् छात्रैः साध्यापकैः सप्राचार्यैः शोभायात्रा कृता, यस्यां देशभक्तानां स्मरणम् आदर्शवाक्यानां च उद्घोषणं कुर्वन्तश्छात्राः राष्ट्रभक्तिमयं वातावरणं निर्मितवन्तः। अनन्तरं परिसरे ८.३० वादने परिसरप्राचार्यैः ध्वजारोहणमाचरितम्। स्वभाषणे राष्ट्रसेवार्थं सर्वे कटिबद्धा भवेयुरिति तैः प्रतिपादितम्। ततः परं परिसरच्छात्रैः राष्ट्रभक्तिप्रधानगीत-नृत्य-नाटकादीनि प्रदर्शितानि। पक्षान्ते प्रतियोगितासु विजेतृणां कृते पुरस्काराः प्राचार्यैः प्रदत्ताः।




सम्बोधयन् आचार्यः रामेश्वरभट्टाचार्यः

## संस्कृतसप्ताहोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य एकलव्यपरिसरे अगस्तमासस्य १६ दिनाङ्कादारभ्य २२ दिनाङ्क- पर्यन्तं संस्कृतसप्ताहोत्सवः समाचरितः। १६ दिनाङ्के प्रवृत्ते उद्घाटनसत्रे त्रिपुराविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः आचार्यः सीतानाथ दे-महाभागः मुख्यातिथिरूपेण समागतः। "संस्कृतं सर्वासां भाषाणां जननी वर्तते। पूर्वोत्तरक्षेत्रस्य प्रान्तीयभाषासु संस्कृतस्य प्रचुरप्रभावः परिदृश्यते" इति सोदाहरणं तैः प्रतिपादितम्। संस्कृतस्य पूर्वोत्तरराज्येषु प्रचारः प्रसारश्च एकलव्यपरिसरेण अत्रत्यच्छात्रैश्च सुष्ठु क्रियेत, येन सर्वत्र संस्कृतं गतमहिमानं पुनरपि प्राप्नुयादिति चाशंसितम्।

कार्यक्रमस्य आध्यक्षं वहद्भिः परिसरप्राचार्यैः आचार्यैः सर्वनारायणझामहोदयैः - भारतसर्वकारपक्षतः यदि केन्द्रीयसंस्कृतविश्वविद्यालयः प्रतिष्ठाप्येत संस्कृतस्य इतोप्यतिशयेन प्रसारः भवेदित्युक्त्वा संस्कृतच्छात्राणां दिशानिर्देशः कृतः। कार्यक्रमेऽस्मिन् अतिथीनां स्वागतम् आचार्यसच्चिदानन्द- तिवारीमहोदयेन कृतम्। शिक्षाशास्त्रविभागप्राध्यापकेन डॉ. गौराङ्गबाघमहोदयेन धन्यवादः आविष्कृतः। वेदान्तविभागप्राध्यापकेन विश्वनाथहेगडेमहोदयेन सभा सञ्चालिता।

अगस्तमासस्य २२ दिनाङ्के अस्य संस्कृतसप्ताहस्य समापन- समारोहः परिसरे परिपालितः। अस्मिन् कार्यक्रमे एम्.बि.बि. महाविद्यालयस्य संस्कृतविभागाध्यक्षचरेण आचार्यरामेश्वरभट्टाचार्यमहोदयेन मुख्यातिथित्वेन सम्प्राप्य संस्कृते विद्यमानवैज्ञानिकतथ्यानां परिचयः कारितः। परिसरे संस्कृतसप्ताहव्याजेन छात्रेभ्यः भाषणम्, आशुभाषणं, संस्कृतगीतं, प्रश्नमञ्चः, समस्यापूर्तिः, श्लोकोच्चारणं, निबन्धलेखनं, भाषानुवादादिस्पर्धाः आसप्ताहं समायोजिताः आसन्। विशेषतः अगरतलास्थविभिन्नविद्यालयच्छात्रेभ्यः श्लोको-च्चारणप्रतिस्पर्धाः स्तरद्वयोः आयोजिताः यत्र दशाधिकविद्यालयेभ्यः छात्राः प्रतियोगितासु भागम् अग्रहीषुः। तासु प्रतियोगितासु विजेतृभ्यः सर्वेभ्यश्छात्रेभ्यः मञ्चस्थगण्यैः पुरस्काराः वितरिताः। कार्यक्रमाध्यक्षैः परिसरप्राचार्यैः अतिथयः सम्मानिताः। व्याकरणविभागाध्यक्षैः आचार्यधनीन्द्रकुमारझामहोदयैः अतिथीनां स्वागतं व्याहृतम्। सभान्ते च साहित्यविभागाध्यक्षैः आचार्यसच्चिदानन्दतिवारिमहोदयैः धन्यवादः समर्पितः। ज्योतिषविभागप्राध्यापकेन डॉ. अरुणकुमारमहोदयेन सभा सञ्चालिता। व्याकरणविभागप्राध्यापकेन डॉ. भानुशर्ममहोदयेन सप्ताहात्मककार्यक्रमस्यास्य संयोजनं कृतम्।

## भाषाबोधनवर्गः

अगस्तमासस्य २२ दिनाङ्कतः २२ सितेम्बरपर्यन्तं शिक्षाशस्त्रिप्रथमवर्षच्छात्रेभ्यः मासात्मकः भाषाबोधनवर्गः विभागेन समनुष्ठितः। वर्गेऽस्मिन् संस्कृत-हिन्दी-आङ्ग्ल-बङ्गला-भाषाणां लिङ्गवचनपुरुषादिविषयाणां परिचयः तेषां प्रयोगस्य च परिचयोऽकारि। एतेन छात्राः भृशं लाभान्विताः।

## गणेशोत्सवः शिक्षकदिवसाचरणं च

सितेम्बरमासस्य ५ दिनाङ्के परिसरस्य सभागारे छात्रैः गणेशोत्सवः समाचरितः। वैदिकपूजाविधानेन श्रीगणेशस्य अर्चनं सुष्ठु विहितम्। अपराह्णे शिक्षकदिवसमभिलक्ष्य आयोजिते कार्यक्रमे छात्रैः गुरुपूजनं समाचरितम्। कार्यक्रमस्य अध्यक्षैः परिसरप्राचार्यैः छात्रेभ्य शुभाशंसनं च प्रदत्तम्।

## हिन्दीपखवाडा

भारतसर्वकारस्य आदेशमनुसृत्य सितेम्बरमासस्य १४ तः २८ पर्यन्तं परिसरे हिन्दीपखवाडाकार्यक्रमः समाचरितः। १४ तमे दिनाङ्के सरस्वत्याः समर्चनेन कार्यक्रमोऽयं समुद्घाटितः। परिसरस्य हिन्दीप्राध्यापकेन डॉ. ब्रह्मानन्दमिश्रमहोदयेन अतिथीनां स्वागत- पुरस्सरं प्रास्ताविकभाषणं प्रदत्तम्। साहित्यविभागाध्यक्षाः आचार्याः सच्चिदानन्दतिवारीवर्याः हिन्दीभाषाया आवश्यकता महत्त्वं च प्रतिपादितवन्तः। धर्मशास्त्रविभागाध्यक्षैः आचार्यखगेश्वरमिश्रमहोदयैः आध्यक्ष्यमूढ्वा हिन्दीपक्षाचरणस्य प्रयोजनं प्रत्यपादि।

२८ तमे दिनाङ्के अस्य हिन्दीपखवाडाकार्यक्रमस्य समापनसमारोहः अभवत्। कार्यक्रमेऽस्मिन् अगरतलास्थ-हिन्दी-उच्चतरकन्याविद्यालयस्य प्राचार्या श्रीमतीमधुमितादत्ता मुख्याभ्यागतासीत्, यया आधुनिकसमाजोत्कर्षाय हिन्दीभाषायाः तत्साहित्यस्य च प्रासङ्गिकता केति प्रतिपादितम्। कार्यक्रमाङ्गतया आयोजितासु हिन्दीकवितास्पर्धा-भाषणस्पर्धा-निबन्ध-लेखनस्पर्धादिषु प्राप्तस्थानेभ्यः छात्रेभ्यः समारोहेऽस्मिन् पुरस्कराः प्रदत्ताः। परिसरप्रचार्याणामाध्यक्ष्ये प्रवृत्तेऽस्मिन् कार्यक्रमे शिक्षाशास्त्रविभागाध्यक्षैः डा. पवनकुमारमहोदयैः स्वागत-भणितिः ज्योतिषविभागप्राध्यापकेन डा. दीपकुमारमहोदयेन धन्यवादविज्ञप्तिश्च आविष्कृता। परिसरस्य सर्वे अध्यापकाः, छात्राः, कर्मचारिणश्च सोत्साहं कार्यक्रमे भागम् अवहन्।



अतिथिं सम्मानयन् प्राचार्यः

## व्याकरणविभागीयराष्ट्रियसङ्गोष्ठी

एकलव्यपरिसरस्थ-व्याकरणविभागेन सितेम्बरमासस्य १७ दिनाङ्के 'समासप्रक्रियाविमर्शः' इति विषयमवलम्ब्य एकदिवसीया राष्ट्रियसङ्गोष्ठी समायोजि। वेदघोषणपुरस्सरं समारब्धे कार्यक्रमेऽस्मिन् मुख्यवक्तृरूपेण कोल्कत्तास्थश्रीसीताराम-वैदिकादर्शसंस्कृतमहाविद्यालयस्य व्याकरणप्राध्यापकैः डॉ. सुधाकरमिश्रैः समुपस्थाय समासप्रक्रियाविमर्श इत्ययं विषयः सोदाहरणं विमृष्टः। परिसरव्याकरणविभागाध्यक्षैः आचार्यधनीन्द्रकुमारझावर्यैः स्वागतिकवच आविष्कृतम्। परिसरप्राचार्यैः आध्यक्षेण आतिथेयं प्रदत्तम्। सङ्गोष्ठ्यामस्यां पञ्चदशाधिकविद्वद्भिः शोधपत्राणि पठितानि। धन्यवादाविष्करणपुरस्सरं शान्तिमन्त्रेण सङ्गोष्ठी अवसिता।

## साहित्यविभागीयराष्ट्रियसङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य एकलव्यपरिसरे १८.०९.२०१६ दिनाङ्के साहित्यविभागीयराष्ट्रियसङ्गोष्ठी समभवत्। 'संस्कृतसाहित्यस्य दिशानिर्देशनं समसामयिकसम्भावनाश्च' इत्यमुं विषयमाश्रित्य प्रवृत्तायामस्यां सङ्गोष्ठ्यां कोल्कत्तास्थ-श्रीसीतारामवैदिकादर्शसंस्कृत-महाविद्यालयस्य प्राचार्येण डॉ. सोमेश्वरमिश्रेण मुख्यातिथित्वेन कुञ्चिकाभाषणं चोपन्यस्तम्। परिसरप्राचार्यैः आचार्यसर्वनारायणझामहोदयैः अतिथीनां सभाजनं कृत्वा आधुनिककाले संस्कृतस्य प्रासङ्गिकता केति निरूपिता। साहित्यविभागप्राध्यापिका डॉ. मञ्जुथेमदेवमहोदयया सङ्गोष्ठ्याः सञ्चालनं कृतम्। सङ्गोष्ठ्याः संयोजकः साहित्यविभागध्यक्षश्च आचार्यसच्चिदानन्दतिवारिमहोदयः समुपस्थितः आसीत्। सङ्गोष्ठ्यामस्यां षोडशाधिकविद्वद्भिः पत्राणि प्रस्तुतानि।



सम्बोधयन् प्राचार्यः प्रो. सर्वनारायणझाः

## मुक्तस्वाध्यायपीठस्य सम्पर्ककक्षोद्घाटनम्

परिसरे सितेम्बरमासस्य २२ तमे दिनाङ्के मुक्तस्वाध्यायपीठस्य छात्राणां कृते सम्पर्ककक्षाः समुद्घाटिताः। कार्यक्रमं दीपप्रज्वालनपुरस्सरं समुद्घाट्य परिसरप्राचार्याः मुक्तस्वाध्यायपीठस्थापनोद्देश्यं तस्य उपयोगस्य च विवरणं सम्यगुपस्थाप्य छात्रैः सम्पर्ककक्षायाः प्रयोजनं स्वीकर्तव्यम् इति आशंसन्। कार्यक्रमे व्याकरणविभागप्रमुखैः आचार्यधनीन्द्रकुमारझामहोदयैः समागतानां स्वागतं व्याहृतम्। धर्मशास्त्रविभागाध्यक्षाः आचार्यखगेश्वरमिश्राः सारस्वतातिथिरूपेण समुपस्थिता आसन्। मुक्तस्वाध्यायपीठस्य संयोजकेन डॉ. कृपाशङ्करमहोदयेन सभा सञ्चालिता। परिसरीयाध्यापकाः मुक्तस्वाध्याय-पीठस्य छात्राश्च सभायां समुपस्थिता आसन्।

## राजीवगान्धीपरिसरवार्ता



उद्घाटनसत्रस्य एकं दृश्यम्

जुलैमासस्य २९ दिनाङ्के वाग्वर्धिनी-स्पर्धिष्णु-वाक्यार्थ-शारदाविशिष्टव्याख्यान-मालापरिषदाम् उद्धााटनं जातम्। तिरूपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिवर्याः प्रो.एम्.एल्. नरसिंहमूर्तिवर्याः समागत्य उद्घाटनभाषणं शारदाविशिष्टव्याख्यानमालायां वेदान्तशास्त्रे विशिष्टं व्याख्यानञ्चाकार्षुः। परिसरप्राचार्याः प्रो.ए.पि.सच्चिदानन्दवर्याः आध्यक्ष्यं निरवहन्। शिक्षाशास्त्रविभागप्राध्यापकः डॉ. वेङ्कटरमणभट्टः कार्यक्रमं सञ्चालितवान्।

अगस्टमासस्य १५ दिनाङ्के परिसरेऽस्मिन् स्वतन्त्रोत्सवः समाचरितः। प्रातः ८.३० वादने परिसरप्राचार्याः आचार्याः ए.पि.सच्चिदानन्दवर्याः ध्वजोत्तोलनमकुर्वन्। एतदनन्तरं प्राचार्याणामाध्यक्ष्ये सभाकार्यक्रमः सम्पन्नः। तत्र परिसरस्याध्यापकाः छात्राश्च स्वतन्त्रोत्सव-मुपलक्ष्य भाषणानि व्यधासिषुः। परिसरीयाः छात्राः सांस्कृतिककार्यक्रमान् प्रादुः। छात्राः गीतनृत्यरूपकप्रहसनादिकार्यक्रमान् कृतवन्तः। व्याकरणप्राध्यापकाः डॉ.कृष्णानन्तपद्मनाभन्-वर्याः कार्यक्रमं चालितवन्तः। अनुस्यूततया पञ्चदशदिनानि छात्राः मासेऽस्मिन् महापुरुषाणां विषये प्रत्यहं भाषणं कृतवन्तः।




सम्बोधयन् प्राचार्यः प्रो. ए.पि. सच्चिदानन्दवर्यः

प्रतिवर्षमिव अस्मिन्नपि वर्षे परिसरे संस्कृतोत्सवः महता सम्भ्रमेण समाचरितः। श्रावणपूर्णिमायाम् अगस्टमासस्य १९ दिनाङ्के श्रीमठस्य गुरुभवने अनन्तश्रीविभूषितानां श्री श्री भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्च दिव्यसान्निध्ये संस्कृतोत्सवस्य उद्घाटनं जातम्। २५ दिनाङ्के अस्य उत्सवस्य समारोपसमारोहः सञ्जातः। मुख्याभ्यागतत्वेन साञ्ची-बौद्धविश्वविद्यालयस्य कुलपतिचराः देहलीस्थ जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतविभागप्रमुखा आचार्याः शशिप्रभाकुमारवर्याः भागमगृह्णन्। एतदुपलक्ष्य परिसरे परिसरीयच्छात्राणां कृते, श्रृङ्गगिरिमण्डलस्य माध्यमिकविद्यालयानां छात्राणां च कृते विविधाः स्पर्धाः समायोजिताः आसन्। कोप्पामण्डलस्य माध्यमिकविद्यालयेषु संस्कृतरसप्रश्नस्पर्धाः, संस्कृतभाषाविषयकम् एकं व्याख्यानञ्च आयोजितमासीत् परिसरेण। सर्वत्र छात्राः आधिक्येन भागमगृह्णन् पुरस्काराञ्च प्राप्नुवन्। अत्र सन्दर्भे परिसरीयाः सर्वे प्राध्यापकाः छात्राश्च साहयमाचरन्।

सप्टेम्बर ०३, २०१६ तमे दिनाङ्के डॉ. वि.आर्. गौरीशङ्करवर्याणाम् आध्यक्ष्ये स्थानीयप्रबन्धकसमितेः उपवेशनमभवत्। तत्र रजतमहोत्सवस्य पूर्वभाविचिन्तनं कृतम्।

सप्टेम्बरमासस्य १०, ११, १२ दिनाङ्केषु विश्वविद्यालयानुदानायोगपुनरीक्षणसमितिः परिसरं प्रति आगत्य परिसरस्य पुनरीक्षणं कृतवती।

६.९.२०१६ दिनाङ्के वास्तु डिप्लोमा-कोर्स परिसरे उद्घाटितम्

मुक्तस्वाध्यायपीठस्य सम्पर्ककक्षाकार्यक्रमस्य उद्घाटनमभवत् १८.०९.२०१६ दिनाङ्के।

२३.०९.२०१६ दिनाङ्के परिसरे हिन्दीदिवस एवं शिक्षकदिवससमारोहस्य कार्यक्रमः सञ्जातः। मुख्याभ्यागतत्वेन श्री ज्ञानचन्दमर्मज्ञवर्यः समागत आसीत्। शिक्षकदिवससमुपलक्ष्य शिक्षणक्षेत्रे सामाजिकक्षेत्रे च कृतश्रमयोः द्वयोः विदुषोः सम्मानमपि परिसरेण कृतम्।

२७.०९.२०१६ दिनाङ्के अध्यापकानां द्वितीयः वाक्यार्थः परिसरे सञ्जातः। आचार्याणां महाबलेश्वरभट्टवर्याणमाध्यक्ष्ये परिसरस्य चत्वारः प्राध्यापकाः वाक्यार्थान् प्रास्तुवन्।

## गुरुवायूरपरिसरवार्ता

### योगायुर्वेदयोः योग्यताशिक्षा

ऐदम्प्राथम्येन राष्ट्रियसंस्कृतसंस्थानेन प्रदत्तादेशानुगुणं केरलस्थगुरुवायूरपरिसरे योगशास्त्रे तथा आयुर्वेदविषये च योग्यताशिक्षा (The Diploma Course in Yoga and Ayurveda) अगस्तमासस्य पञ्चविंशतिदिनाङ्के समारब्धा। एकवर्षात्मकनूतनपाठ्यक्रमेऽस्मिन् षाण्मासिकपरीक्षाद्वयं विद्यते। द्वन्द्वोपाधिप्रमाणपत्रसहितत्वेन (Duel certificate course) पाठ्यक्रमोऽयम् उद्घोषितः। अर्थात् प्रातः तथा सायं च ये पिपठिषवः तेभ्यः, तथैव औपचारिकरूपेण परिसरसमये ये चाध्येतुमिच्छन्ति तेभ्यश्चेति द्विधात्र अवसरः प्रकल्पितः। अत्राध्ययनाय संस्कृतविषयसहितायाः उच्चमाध्यमिकपरीक्षायाः (द्वादशीस्तरे) उत्तीर्णतानिवार्यत्वेन निर्दिष्टा।

### सप्ततितमः स्वातन्त्र्यदिनोत्सवः

पक्षात्मकोपेतः स्वातन्त्र्यदिनोत्सवः परिसरीयच्छात्रैः शिक्षकैश्चानुपालितः। स्वातन्त्र्यं लक्ष्यीकृत्यानेकाः स्पर्धाः तथा कार्यक्रमाः

समायोजिताः तथा – आशुभाषणम्, प्रबन्धलेखनम्, नाटकानि, वादविवादः, रङ्गवल्ली, क्रीडाः, विशेषवस्त्राभूषणालङ्कारस्पर्धा, प्रादेशिक-स्वातन्त्र्यस्मृतिचिह्नानां प्रदर्शनम् इत्यादि। अवसरेऽस्मिन् अगस्तमासस्य पञ्चविंशतिदिनाङ्के प्रातःकालिकपताकावन्दनकार्यक्रमे संस्कृतभाषा-माध्यमेन परिसरप्राचार्याः सोद्वेगपूर्वकस्वातन्त्र्यविषयकभाषणम् अकुर्वन्। उत्तमच्छात्राः पुरस्कारभाजश्चाभवन्।

### संस्कृतसप्ताहकार्यक्रमः

भारतसर्वकारस्य तथा राष्ट्रियसंस्कृतसंस्थानस्य चादेशानुगुणं शैक्षिकवर्षेऽस्मिन्नपि गुरुवायूरपरिसरे संस्कृतसप्ताहोत्सवः परिसरीयजनैः सर्वैः मिलित्वाचरितो वर्तते। संस्कृतसप्ताहोत्सवकार्यक्रमाः अनुस्यूततया अगस्तमासस्य षोडशदिनाङ्कतः द्वाविंशतिदिनाङ्कपर्यन्तं समायोजिताः। षोडशदिनाङ्के प्रातः सार्धदशवादने परिसरप्राचार्याणामाध्यक्ष्ये, विद्वद्वरेण्यानां सुरभारतीसेवकानां समक्षे, परिसरच्छात्राध्यापकगणोपस्थितौ चास्य कार्यक्रमस्य आरम्भः प्रो.के.रामसुब्रमणियन् (आई.आई.टि. मुम्बई) महोदयैरकारि। सन्दर्भेऽस्मिन् माध्यमिकस्तरादारभ्य स्नातकोत्तरस्तरपर्यन्तं सर्वेभ्यः परिसरपरिसरेतरछात्रेभ्यः पृथक्पृथक्तया नैकाः संस्कृतभाषामाध्यमस्पर्धाः आयोजिताः। तथैव परिसरीयाध्यापकैः तथा विशेषाध्यापकैश्च सङ्गोठ्यादिकार्यक्रमेषु भागग्रहणं स्वीचक्रे। कार्यक्रमस्यास्य समापनोत्सवस्तु अगस्तमासस्य द्वाविंशतिदिनाङ्के अपराह्ने द्विवादने तिरुपतिस्थ श्री वेङ्कटेश्वरविश्वविद्यालयस्य कुलपतिमहोदयानामातिथ्ये समभवत्। इमे समापनोत्सवे छात्रान् समुपदिश्य उत्तमच्छात्रेभ्यः, विशेषाध्यापकेभ्यश्च पुरस्कारवितरणञ्चाकुर्वन्। तथैवास्मिन्नेव समापनोत्सवकार्यक्रमे त्रिकर्मशुद्ध्या सुरभारतीरक्षायै रक्षाबन्धनकार्यक्रमश्च परिसरीयैः समाचरितः।

### आङ्ग्लभाषापाठ्यक्रमनिर्माणकार्यशाला

राष्ट्रियसंस्कृतसंस्थानस्यानुदेशनेन पावर्टिग्रामस्थे गुरुवायूरपरिसरस्य पुरातनभवने, एस्. वि. आर्. रमणमूर्ति-महोदयानां नेतृत्वे शास्त्रिकक्ष्यायाः तृतीयवर्षस्य आङ्ग्लभाषापाठ्यक्रमनिर्माणाय कार्यशालेयं अगस्तमासस्य द्वादशदिनाङ्कतः षड्विंशतिदिनाङ्कपर्यन्तं प्रवृत्ता। कार्यक्रमस्यास्योद्घाटनं राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवमहोदयैः (प्रभारी) प्रो. सुब्रह्मण्य शर्ममहोदयैरकारि।

### छात्रकल्याणसमितिः

राष्ट्रियसंस्कृतसंस्थानस्यानुदेशनानि, कार्यालयीयनियमान् च परिगणय्य २०१६-१७ तमस्य शैक्षिकवर्षस्यास्य छात्रकल्याणसमितिः गुरुवायूरपरिसरेण सितम्बरमासस्य पञ्चमे दिनाङ्के नियमिता। समित्यामस्यां नैकप्रकारककार्याण्याचरणाय प्रतिभां तथा प्राप्ताङ्कान् गणयित्वा प्रत्येकं कक्ष्यायाः चत्वारः छात्रप्रतिनिधयः सदस्यत्वेन चितास्सन्ति। अत्र प्रधानतया शैक्षिकसमितिः, कलासमितिः, क्रीडासमितिः तथा पत्रिकासम्पादनसमितिः इत्येवं चतस्रः उपसमित्यः भवन्ति। समेषां छात्राणां समक्षे प्राचार्याणां चाध्यक्ष्ये समूहिकचर्चा सितम्बरमासस्य पञ्चमदिनाङ्के प्रवृत्ता। चतुर्विधोपसमित्योपेतच्छात्रकल्याणसमित्याः अध्यक्षत्वेन स्वातिलक्ष्म्याः तथा उत्तरदायकत्वेन पार्वति वि.जे. छात्रायाश्च निर्णयोकारि। समितेः मार्गप्रदर्शनाय परिसरीयश्रेष्ठशिक्षकाः आधुनिकविषयविभागध्यक्षाः एस्.वि.रमणमूर्तिमहोदयाः अध्यक्षरूपेण निश्चिताः। इत्थं प्रत्येकं समितेः मार्गदर्शनाय अध्यक्षरूपेण विभिन्नविभागीयशिक्षकाणां कृते कार्यमदात्।

### संस्कृतसम्भाषणशिबिरकार्यक्रमः

परिसरीयाणां नूतनच्छात्राणां कृते विशिष्य प्राक्शास्त्रिच्छात्राणां तथा शास्त्रिच्छात्राणां च कृते दशदिनात्मकः संस्कृत-सम्भाषणशिबिरकार्यक्रमः समायोजितः। अस्य कार्यक्रमस्य समन्वयकाः डॉ. के. गिरिधर राव्-महोदया आसन्। कार्यक्रमस्यारम्भस्तु सितम्बरमासस्य एकविंशतिदिनाङ्के अभवत्। प्रतिदिनं मध्याह्ने द्विवादनात् सायं चतुर्वादनपर्यन्तं संस्कृतसम्भाषणशिबिरकक्ष्याः अनुस्यूततया प्रचालिताः।

### राष्ट्रियसेवासमितिः

कार्यालयीयादेशानुगुणं छात्रगुणवत्तासम्पादनाय, समाजिकसचेतनायाः जागरणाय च गुरुवायूरपरिसरे पञ्चाशत्-संख्याकानां छात्राणां पञ्जीकरणसहितकार्यप्रणाल्यारचिता वर्तते। समित्यामस्यां सर्वाभ्यः कक्षाभ्यः छात्राः स्वेच्छया नामाङ्कनमकुर्वन्। समित्याः कार्याणि तथा छात्राणां कृते दिशानिर्देशनाय च संयोजकत्वेन शिक्षाविभागाध्यापकाः डा. के.के. हर्षकुमारमहोदयाः प्राचार्यैः प्रो.च.ला.ना.शर्मा महोदयैः निर्णीताः।

### ओणं-महोत्सवस्य पालनम्

केरलस्थे गुरुवायूरपरिसरे दिनद्वयात्मकस्य प्रादेशिकस्य ओणम्महोत्सवस्य आचरणमभवत्। कार्यक्रमस्यास्योद्घाटनं राष्ट्रियसंस्कृत-संस्थानस्य कुलसचिवमहोदयैः प्रो. सुब्रह्मण्यशर्ममहोदयैरकारि। सितम्बरमासस्य अष्टमे तथा नवमे च दिनद्वये छात्रेभ्यः तथा शिक्षकेभ्यश्च विभिन्नकार्यक्रमाः, स्पर्धाश्चायोजिताः। तत्र ओणपाट्टू, तिरुवत्तिरक्कलि, रज्जुस्पर्धा, निम्बफलचमसक्रीडा, आसन्दपरिभ्रमणक्रीडा, तिलकास्थानचयनक्रीडा, रङ्गवल्ली इत्याद्यः क्रीडाः आसन्, कार्यक्रमस्यास्य संयोजकत्वेन डॉ. के.के. षैन् तथा डॉ. विजयलक्ष्मी राधाकृष्णन् च आस्ताम्।

### हिन्दी पखवाडा

सर्वकारस्य तथा संस्थानस्य च आदेशानुगुणम् २०१६-१७तमे शैक्षिकसत्रेऽपि सितम्बरमासस्य षोडशदिनाङ्कतः त्रिंशद्दिनाङ्कपर्यन्तं हिन्दी-पखवाडा-कार्यक्रमः अनुष्ठितो वर्तते। परिसरीयाणां छात्राणां तथा शिक्षिकाणाञ्च कृते नैके कार्यक्रमाः, स्पर्धाश्चायोजिताः। कार्यक्रमस्यास्य समापनोत्सवस्तावत् सितम्बरमासस्य त्रिंशद्दिनाङ्के इरिञ्ञालकुड-प्रदेशस्थ क्रैस्तकलाशालायाः हिन्दीविभागस्याध्यक्षाणां विशेषव्याख्यानेन, परिसरप्राचार्याणामाध्यक्ष्यभाषणेन चाभवत्। विविधासु हिन्दीभाषासम्बद्धस्पर्धासु ये स्वीयां प्रतिभां प्रदर्शितवन्तः तेभ्यः सर्वेभ्यः छात्रेभ्यः शिक्षकेभ्यश्च पुरस्काराः तैर्दत्ताः।

### आङ्ग्लभाषावाचकसङ्घः

विशेषासक्त्या परिसरीयैः केचनोत्तमैः संस्कृतच्छात्रैः मिलित्वा प्राचार्याणामनुमत्या आंग्लभाषायां गुणवत्तासम्पादनाय विनूत्नरूपेण आङ्ग्लभाषावाचकसङ्घः इति कस्यचित् सङ्घस्यारचना कृता। दीपज्योति देव् इति शास्त्रिद्वितीयवर्षस्य छात्रः अस्य सङ्घस्य कार्यभारं वहति। प्रारम्भावसरे छात्राणां कृते मार्गनिर्देशनाय आंग्लविभागाध्यक्षः डॉ. एस्.वि.आर्. मूर्ति-महोदयः तथा एम्. के. षीबा महोदयाचोपस्थितौ।

## श्रीरणवीरपरिसरवार्ता



योगासने निरताः परिसरीयाः

### योगदिवसस्यायोजनम्

भारतसर्वकारस्य निर्देशानुसारं २१.०६.२०१६ दिनाङ्के परिसरेऽस्मिन् योगदिवसस्य सफलमायोजनम् अभवत्। परिसरप्राचार्यस्य प्रो. रामानुजदेवनाथमहोदयस्य आध्यक्षे समायोजितेऽस्मिन् कार्यक्रमे जम्मूस्थ-श्रीपतञ्जलियोगपीठस्य प्रशासकः (योगविशेषज्ञः) श्रीदेवेन्द्रपाधा विशिष्टातिथिः, योगसमितिजम्मूः इत्यस्य मण्डलाध्यक्षः श्रीमतीसुधाशर्मा प्रमुखातिथिरूपेण आस्ताम्। उभयोः नेतृत्वे विविधयोगासनानाम् अभ्यासः, योगाभ्यासेन मानवजीवने लाभाः इत्यादिविषयेषु व्याख्यानम् अप्यभवत्। क्रमेऽस्मिन् परिसरप्राचार्येण "पतञ्जलियोगसूत्राणामभ्यासः" इति विषये स्वीयं सारगर्भितं वैदुष्यपूर्णञ्च विश्लेषणम् प्रस्तुतम्। परिसरीयसाहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरमहोदयेन "योगस्य महत्वम्" इति विषये स्वीयं शास्त्रज्ञानभरितं विश्लेषणम् प्रस्तुतम्। कार्यक्रमस्यावसाने योगप्रदर्शनी अप्यभूत्। कार्यक्रमस्य संयोजकौ डॉ. दयानिधिशर्मा (सहायकाचार्यः, शिक्षाशास्त्रविभागः) तथा डॉ. डी. दयानाथः (सहायकाचार्यः, वेदविभागः) च आस्ताम्।



सत्रारम्भस्य एकं दृश्यम्

### नूतनशैक्षणिकसत्रस्य समारम्भः

१४.०७.२०१६ दिनाङ्के परिसरप्राचार्यस्योपस्थितौ गणेशसरस्वत्योः पूजनपूर्वकं नूतनस्य सत्रस्य समारम्भः समजायत। तस्मिन्नवसरे परिसरीयाः सर्वे विभागाध्यक्षाः अध्यापकाः कार्यालयीयाः कर्मचारिणः छात्राश्च समुपस्थिताः आसन्।

### दशदिवसीयावासीयशिक्षकप्रशिक्षणवर्गः

परिसरे २७.०७.२०१६ दिनाङ्के शिक्षाशास्त्रविभागाध्यक्षेण प्रो. बच्चाभारतीमहोदयेन दशदिवसीयावासीयसंस्कृतसम्भाषणशिबिरस्योद्घाटनं विहितम्। एतत् प्रामुख्येन शिक्षाशास्त्रि-प्रथमवर्षीयाणां छात्राणामेव आसीत्। तस्य शिबिरस्य प्रमुखशिक्षकः श्रीदिलीपचन्द्रवंशी, सहायकशिक्षकश्च श्री तिलकराजशर्मा च आस्ताम्। शिबिरस्य सम्पूर्तिसमारोहः ०५.०८.२०१६ दिनाङ्के आसीत्। तस्मिन् समारोहे मुख्यातिथिरूपेण संस्कृतानुरागिणः जम्मूकश्मीरराज्यस्य भा.ज.पा. इति दलस्य अध्यक्षाः विधायकाश्च श्रीसतपालशर्ममहोदयाः आसन्। कार्यक्रमस्य आध्यक्षं परिसरप्राचार्यैः प्रो. रामानुजदेवनाथमहोदयैः, सञ्चालनं डॉ. मदनकुमारझामहाभागेन च विहितम्।

### स्वतन्त्रता पखवाड़ा इत्यस्य आयोजनम् - ०९.०८.२०१६ तः २३.०८.२०१६ पर्यन्तम्

भारतसर्वकारस्य निर्देशानुसारं परिसरे "आजादी के ७० साल याद करो कुर्बानी" इत्यस्यायोजनमभवत्। पञ्चदशदिवसात्मकेऽस्मिन् कार्यक्रमे अनेकविधाः कार्यक्रमाः समभूवन्। तेषां कार्यक्रमाणां स्वरुपं निम्नक्रमेण वर्तते।

* ०९.०८.२०१६ "आजादी के सत्तर साल" इति विषये भाषणस्पर्धा।

* १०.०८.२०१६ "उदीयमान भारत" इति विषये निबन्धलेखनस्पर्धा।

* ११.०८.२०१६ "स्वाधीनतानता सेनानी" इति विषयमवलम्ब्य एकपात्राभिनयस्पर्धा।

* १२.०८.२०१६ "राष्ट्रिय प्रतीक एवं स्वाधीनता सेनानी" इति विषये रङ्गवल्ली (रंगोली) स्पर्धा।

* १५.०८.२०१६ दिनाङ्के स्वतन्त्रतादिवसस्योपलक्ष्य "राष्ट्रध्वजारोहणम्" परिसरप्राचार्यस्य करकमलेन कृतम्। परिसरप्राचार्यस्य प्रो. रामानुजदेवनाथवर्यस्य नेतृत्वे प्रभातपरिक्रमायाः आयोजनमपि अभवत्। अवसरेऽस्मिन् सर्वे परिसरसदस्याः छात्राश्च उपस्थिताः आसन्।

* १६.०८.२०१६ तः २२.०८.२०१६ पर्यन्तं स्लोगन-प्रतियोगितायाः आयोजनमभूत्। परिसरीयैः छात्रैः तस्यां प्रतियोगितायाः-महमहमिकतया भागं गृहीतम्।

* २३.०८.२०१६ समस्तपाक्षिककार्यक्रमस्य समापनं परिसरप्राचार्यस्य मार्गदर्शने समभूत्। तस्मिन्नेव दिने विविधस्पर्धासु विजेतृच्छात्राणां पुरस्कारवितरणकार्यक्रमः प्रो. हरिनारायणतिवारी (अध्यक्ष-व्याकरणविभागः) डॉ. प्रभातकुमारमहापात्रः (ज्योतिषविभागाध्यक्षः) चेत्यनयोः समुपस्थितौ अभवत्। पक्षव्यापिकार्यक्रमस्य संयोजकाः डॉ. योगेन्द्रकुमारदीक्षितः (सहायकाचार्यः राजनीतिशास्त्रम्)। डॉ. दयानिधिशर्मा (सहायकाचार्यः शिक्षाशास्त्रविभागः) एवं डॉ. राजेन्द्रलालः (सहायकाचार्यः शारीरिकशिक्षा) च आसन्।

## संस्कृतसप्ताहस्यायोजनम्

दिनाङ्के १६.०८.२०१६ तः २२.०९.२०१६ पर्यन्तं परिसरे विविधकार्यक्रमात्मकः संस्कृतसप्ताहसमारोह उत्साहपूर्वकः आयोजितः। प्रथमदिवसे १६.०८.२०१६ दिनाङ्के-

**"कृष्णाय वासुदेवाय हरये परमात्मेन।**
**प्रणतः क्लेशनाशाय गोविन्दाय नमो नमः"।।**

इति मन्त्रस्य (अष्टयाम) चतुर्विंशतिहोरात्मकम् अखण्डपारायणम् समभवत्। तत्र प्राचार्याः सर्वे विभागाध्यक्षाः, अध्यापकाः कर्मचारिणः छात्राश्चोपस्थिताः आसन्। तत्र अतिथिरूपेण जम्मूविश्वविद्यालयस्य प्रो. राजेन्द्रमिश्रमहोदयाः उपस्थिताः आसन्।

१७.०८.२०१६ दिनाङ्के (द्वितीयदिवसे) अखण्डपारायणस्य सम्पूर्तिरभवत्।

## 'श्रीशङ्करशास्त्रार्थपरिषद्' 'शारदाविशिष्टव्याख्यानमाला' इत्यनयोः उद्घाटनम्

संस्कृतसप्ताहस्य क्रमे १७.०८.२०१६ दिनाङ्के 'श्रीशङ्करशास्त्रार्थपरिषद्' तथा 'श्रीशारदाविशिष्टव्याख्यानमाला' इत्यनयोः समुद्घाटनमभवत्। तस्मिन् उद्घाटनसमारोहे देहलीस्थश्रीलालबहादुरराष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागाध्यक्षचराः समुपस्थिताः आसन्। तेन 'वेद एवेश्वरो लोके' इति विषये स्वीयं शास्त्रज्ञानभरितं व्याख्यानं प्रस्तुतम्। श्रीशङ्कर-शास्त्रार्थपरिषद उद्घाटनदिवसे वेद-विभागस्य शास्त्रार्थमपि प्राचलत्। वेद-विभागीयाः अध्यापकाः, डॉ. अरुणकुमारमिश्रः, डॉ. डी. दयानाथः, डॉ. दीपककुमारशर्मा च स्व-स्वशास्त्रसम्बन्धितं शास्त्रार्थकौशलं प्रस्तुतवन्तः।



उद्घाटनसत्रस्य एकं दृश्यम्

## अभिनवगुप्तविषयकं विशिष्टव्याख्यानम्

संस्कृतसप्ताहायोजनस्य क्रमे १९.०८.२०१६ दिनाङ्के आचार्यअभिनवगुप्तविशिष्टव्याख्यानसत्रं समायोजितम्। तस्मिन् व्याख्याने मुख्यवक्तृरूपेण कश्मीरविश्वविद्यालयस्य पूर्वप्राध्यापकाः डॉ. जे.के. शर्ममहोदयाः समुपस्थिताः आसन्। तैः अभिनवगुप्तस्यावदानविषये विशिष्टं व्याख्यानम् प्रस्तुतम्। प्रमुखवक्तृरूपेण समाहूताः जम्मूस्थाः प्रख्यातविद्वत्तल्लजाः पं. सोमनाथशर्ममहोदया अपि आचार्यभिनवगुप्तस्य वैशिष्ट्यमिति विषयमधिकृत्य व्याख्यानं प्रस्तुतवन्तः। कार्यक्रमेऽस्मिन् शास्त्रसौरभम् इति ग्रन्थस्य विमोचनमपि अतिथीनां करकमलैः अभवत्।

## कविगोष्ठ्याः आयोजनं विदुषां सम्माननं व्याख्यानं च

२२.०८.२०१६ दिनाङ्के काश्मीरवास्तव्येन श्रीप्रदीपकौलमहोदयेन आचार्याभिनवगुप्तविषयकं विशिष्टं व्याख्यानं प्रदत्तम्। तेन अभिनवगुप्तस्य जीवनं तस्य तन्त्रसाधना तद्ग्रन्थानां परिचय इत्यादिविषयाः प्रतिपादिताः। तस्मिन् क्रमे संस्कृतविदुषां सम्मानमपि समजायत। जम्मूकश्मीरराज्यस्य प्रख्यातसंस्कृतविद्वांसौ श्रीलक्ष्मीदत्तशास्त्रि डॉ. वेदप्रकाशरैणामहोदयौ



कविगोष्ठ्यां सम्मिलिताः कवयः

सम्मानितौ। श्रीलक्ष्मीदत्तमहोदयः 'साहित्यविद्याविशारदः' इति सम्मानेन डॉ. वेदप्रकाशमहोदयः 'साहित्यशिक्षाविशारदः' इति सम्मानेन च सम्मानितौ अभूताम्। अन्ते च वाणीविलाससभागारे संस्कृतकविसंगोष्ठी अभवत्। परिसरप्राचार्यस्य प्रो. आर्. देवनाथमहोदयस्याध्यक्षे समायोजितेऽस्मिन् कार्यक्रमे जम्मूविद्यालयस्य प्राध्यापकाः प्रो. केदारनाथशर्मा, डॉ. रामबहादुरशुक्लः, डॉ. प्रतिभा च समागताः आसन्। परिसरीयैः अध्यापकैः, प्रो. शरत्-चन्द्रशर्म, डॉ. तेजनाथपौडेल-डॉ. राजकुमारमिश्र-डॉ. अम्बरीशकुमारमिश्रप्रभृतिभिः कविपुंगवैः स्वकविता कामिनीभिः सहृदयजनमनोरञ्जनं विहितम्।

## जम्मूकश्मीरराज्यउपभोक्तादिवसः

२९.०८.२०१६ उपभोक्तासुरक्षासंगठनम् इति संस्थायाः सहयोगेन श्रीरणवीरपरिसरे जम्मूकाश्मीरराज्यउपभोक्तादिवसः समायोजितः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन श्रीमान्- जुल्फीकारअली, मन्त्री (सी.ए.पी.डी.), अतिथित्वेन च श्रीसुरेन्द्रचौधरी (एम.ए.सी.) श्री जी.एस्. चिब (निर्देशकः सी.ए.पी.डी.), श्री डी. आर. दानि (अध्यक्षः उपभोक्तासुरक्षासंगठनम्) इत्यादयः आसन्। परिसरप्रचार्यस्याध्यक्षे सम्पन्नेऽस्मिन् कार्यक्रमेः उपभोक्तॄणां जागरुकतायै तेषाम् अधिकारादिविषये चर्चा विहिता। कार्यक्रमस्य सञ्चालनं डॉ. मदनकुमारझामहोदयेन कृतम्।

## शिक्षकदिवसकार्यक्रमः गणेशोत्सवस्यायोजनञ्च



शिक्षकदिवसे सम्मानयन् प्राचार्यः प्रो. रा.देवनाथवर्यः

०५.०९.२०१६ दिनाङ्के गणेशचतुर्थीपर्वण उपलक्ष्य परिसरे गणेशप्रतिमापूजनपूर्वकं गणेशोत्सवस्यायोजनम् अभवत्। परिसरप्राचार्याणां प्रो. आर्. देवनाथमहोदयानां करकमलाभ्यां समारब्धेऽस्मिन् पूजनकार्यक्रमे परिसरीयाः सर्वे विभागाध्यक्षाः अध्यापकाः कर्मचारिणः छात्राश्च समुपस्थिताः आसन्।

तस्मिन्नेव दिने शिक्षकदिवसस्यायोजनात्मकः कार्यक्रमोऽप्यभवत्। तस्मिन् कार्यक्रमे विशिष्टातिथिरूपेण जम्मूकश्मीरक्षेत्रस्य केन्द्रीयविद्यालयसंगठनस्य उपायुक्ताः श्री एस. साम्बन्नामहोदयाः समुपस्थिता आसन्। मुख्यातिथिरूपेण च बनतालाबकेन्द्रीय-विद्यालयस्य प्रचार्याः, श्री बी. सन्तोषमहोदयाः समाहूता आसन्। परिसरप्राचार्याणां प्रो. रामानुजदेवनाथन् महोदयस्याध्यक्षे समायोजितेऽस्मिन् कार्यक्रमे जम्मूस्थकेन्द्रीयविद्यालयस्य संस्कृताध्यापिकायाः श्रीमतीसुषमाशर्ममहोदयायाः "शिक्षकशिरोमणिः" इति सम्मानेन सम्मानमभवत्। एवं केन्द्रीयविद्यालयबनतालावस्य प्राचार्यस्य वी. सन्तोषमहोदयस्यापि "शिक्षकशिरोमणिः" इति सम्मानेन सम्माननमभूत्।



शिक्षकदिवसे सम्मानयन् प्राचार्यः प्रो. रा.देवनाथवर्यः

## "हिन्दीपखवाड़ा" इत्यस्य आयोजनम्

१४.०९.२०१६ तः २३.०९.२०१६ पर्यन्तं राजभाषा-प्रकोष्ठ इत्यस्य अध्यक्षा आधुनिक-विभागस्य अध्यक्षाः च प्रो. शरत्चन्द्रशर्ममहोदयस्य संयोजकत्वे "हिन्दीपखवाड़ा" इत्यस्यायोजनमुत्साहपूर्वकमभूत्। १४.०९.२०१६ दिनाङ्के "श्रीरामचरितमानस" इत्यस्य चतुर्विंशतिहोरात्मकम् अखण्डपारायणम् इत्यस्यायोजनमभूत्। तत्र परिसरप्रचार्यास्य नेतृत्वे निर्देशने च निर्विघ्नरूपेण पारायणकार्यक्रमस्य सम्पूर्तिः १५.०९.२०१६ दिनाङ्के अपराह्णे अभवत्। एतस्य कार्यक्रमस्य संजोजकः डॉ. संजयकुमारमिश्रः (सहायकाचार्यः हिन्दी) आसीत्। तत्र अध्यापकानां छात्राणां कार्यालयीयकर्मचारिणाञ्च निबन्ध-लेखन, काव्यपाठ-इत्यादयः विविधस्पर्धाकार्यक्रमाः अभवन्। सर्वे परिसरसदस्याः उत्साहपूर्वकं भागं गृहीतवन्तः।

## "हिन्दी पखवाड़ा" समारोहस्य समापनम्

२०.०९.२०१६ दिनाङ्के "हिन्दी पखवाड़ा" इत्यस्य समारोहस्य समापनकार्यक्रमोऽभवत्। परिसरप्राचार्यस्य प्रो. आर्. देवनाथमहोदयस्य आध्यक्षे संजातेऽस्मिन् कार्यक्रमे मुख्यातिथि रूपेण परिसरस्य पूर्वप्राचार्याः वर्षेऽस्मिन् राष्ट्रपतिपुरस्कारार्थं चिताः प्रो. प्रियतमचन्द्रशास्त्रि महोदयाः आसन्। तेषां कुशलसेवाकार्यार्थं विशिष्टवैदुष्यस्य सम्मानार्थञ्च प्रशस्तिपत्रेण सम्माननमप्यभूत्। तस्मिन् कार्यक्रमे विशिष्टातिथिरूपेण जम्मूविश्वविद्यालयस्य हिन्दी-विभागस्य अध्यक्षचर्यः प्रो. श्रीमतीपरमेश्वरी समागताः आसन्। तस्मिन् क्रमे पूर्वायोजितासु निबन्धलेखन, काव्यपाठादि-प्रतियोगितासु पुरस्कारेण सभाजितानां छात्राणां, कर्मचारिणाम् अध्यापकानाञ्च पुरस्कारप्रदानमपि मञ्चासिनैः विशिष्टजनरैकारि। कार्यक्रमस्य सञ्चालनं हिन्दी पखवाड़ा समारोहस्य समन्वयकेन डॉ. संजयकुमारमिश्रेण कृतम्।

## भोपालपरिसरवार्ता



प्रो. विद्यानन्दझावर्याणां सौप्रस्थानिककार्यक्रमस्य दृश्यम्

### सत्रारम्भसमारोहः

भोपालपरिसरे जुलाईमासस्य २९ दिनाङ्के शैक्षणिकसत्रस्य शुभारम्भः समायोजितः। अस्मिन् दिने एव प्राचार्याणां प्रो. विद्यानन्दझावर्याणां सेवानिर्वृत्तिसमवसरे सौप्रस्थानिकः अभिनन्दनकार्यक्रमोऽपि आयोजितः। समारोहेऽस्मिन् मुख्यातिथिः प्रो. प्रभुदयालमिरः, विशिष्टातिथिः प्रो. वेदनारायणचौधरीमहाशयः च समुपस्थितौ। प्रो. मिश्रः उद्बोधितवान् यत् परिश्रमेणैव विद्याध्ययनं शक्यमिति। चौधरीमहादयोद्बोधने संस्कृतविद्यार्थिनः समाज-संस्कृतयोः महदुत्तरदायित्वं स्वीकुर्युः इति अपि च ज्ञानप्राप्तिप्रयासाय अभिप्रेरिताः। कार्यक्रमेऽस्मिन् प्रो. विद्यानन्दझामहोदयेन अभिप्रेरितं यत् विद्यार्थिद्वारा निश्चलभावेन संस्कृतस्य सेवा करणीया। अस्मिन्नवसरे परिसरस्य नवीनप्राचार्याणां प्रो. एम्. चन्द्रशेखरमहोदयानां स्वागतमपि विहितम्। समारोहेऽस्मिन् विभिन्नविभागैः प्रकाशिताः शोधपत्रिकाः साहित्य- मीमांसा, ज्योतिषमीमांसा, व्याकरणमीमांसा, आधुनिकमीमांसा, जैनदर्शनमीमांसा पुस्तकमेकं शैक्षिकप्रबन्धस्य विविधायामाः च लोकार्पिताः।

### स्वच्छताभियानम्

जुलाईमासस्य १८ दिनाङ्के परिसरे स्वच्छतादिवसकार्यक्रमः आयोजितः। प्रथमं परिसरप्राचार्येण प्रो. विद्यानन्दझामहादयेन कार्यक्रमस्य औचित्यं प्रतिपादितम्। विद्यार्थिभिः साकं अन्तःक्रियायां जीवनस्य मुख्यमूल्यस्वच्छता वर्तते इति शिक्षा संचारिता। अनन्तरं प्राध्यापकैः, विद्यार्थिभिः च सह परिसरस्य स्वच्छतायाः संकल्पः कृतः। कार्यात्मक- दृष्ट्या परिसरस्य बाह्यक्षेत्रस्य स्वच्छता कृता।

### स्वतन्त्रतापखवाड़ाकार्यक्रमस्य उद्घाटनसमारोहः




शोभायात्रायाः किञ्चन दृश्यम्

स्वतन्त्रतादिवसस्य पखवाड़ाकार्यक्रमस्य उद्घाटनसमारोहः अगस्तमासस्य ८ दिनाङ्के समायोजितः। प्राचार्यः प्रो. एम्. चन्द्रशेखरः अध्यक्षत्वेन, धर्मपालशोधपीठस्य प्रो. कुसुमलताकेडिया मुख्यातिथित्वेन च सभां अकर्षिष्टाम्। उद्बोधने स्वतन्त्रताप्राप्तेः हेतोः कृतबलिदानस्य, आत्मत्यागस्य च माहात्म्यं प्रतिपादितम्। मुख्यतः भारतीययुवजनेषु राष्ट्रभक्तेः आत्मगौरवस्य च सञ्चरणाय प्रेरणा प्रदत्ता। कार्यक्रमस्य सफलसञ्चालनं डॉ. गोविन्दपाण्डेय-महोदयेन सम्पादितम्।

### स्वतन्त्रताम् उपलक्ष्य दीपयात्रा

मानवसंसाधनविकासमंत्रालयस्य आदेशानुसारेण परिसरपरिवारेण दीपयात्रायाः आयोजनंविहितम्। अस्यां यात्रायां परिसरप्राचार्यस्य निर्देशनेन दीपयात्रा परिसरभवनात् बागसेवनिया- आरक्षकस्थानकपर्यन्तं, ततः पुनः परिसरे प्रतिष्ठितायाः वाग्देवीमूर्तेः समक्षे यात्रेयं सम्पन्ना।

### स्वतन्त्रतापखवाड़ाकार्यक्रमस्य समापनसमारोहः

**'आज़ादी ७० ज़रा याद करो कुर्बानी'** स्वतन्त्रतापखवाड़ाकार्यक्रमस्य समापनसमारोहः अगस्तमासस्य २३ दिनाङ्के समायोजितः। कार्यक्रमेऽस्मिन् ११ वादने 'समूहिकराष्ट्रगानं' सम्पन्नम्, यस्मिन् परिसरप्राचार्यः, समस्तप्राध्यापकाः, कर्मचारिणः, विद्यार्थिनश्च समुपस्थिताः आसन्। अस्मिन् पखवाड़ाकार्यक्रमे विभिन्नप्रतियोगिताः अप्यायोजिताः, यथा-देशभक्तिगीत-निबन्ध-आशुचित्रण-भाषण-वालीबाल-प्रतियोगिताश्च। प्राचार्यः प्रो. एम्. चन्द्रशेखरः अध्यक्षरूपेण, सेवानिवृत्तप्राशासनिक-अधिकारी श्रीसुरेशजैनः मुख्यातिथिरूपेण, सेवानिवृत्तवायुसेनाधिकारी श्रीपुरुषोत्तम बी. लोखण्डे विशिष्टातिथिः च सभां सुशोभितवन्तः। कार्यक्रमस्य सफलसञ्चालनं डॉ. गोविन्द-पाण्डेयमहोदयेन सम्पादितम्।

### स्वतन्त्रतादिवसकार्यक्रमः

स्वतन्त्रतादिवसमुपलक्ष्य परिसरे प्रातः ९ वादने ध्वजारोहणम्, राष्ट्रगानञ्च विहिते। अनन्तरं प्राचार्येण आशीर्वचांसि शुभकामनाः च प्रकटिताः। प्राचार्यस्य उद्बोधनानन्तरं प्रतिनिधिरूपेण प्राध्यापकद्वयेन, विद्यार्थिद्वयेन च स्वतन्त्रतादिवसस्य कार्यक्रमे स्वविचाराः प्रकटिताः। सानन्दं कार्यक्रमोऽयं सम्पन्नः।

### संस्कृतसप्ताहशुभारम्भः

अगस्तमासस्य १७ दिनाङ्के संस्कृतसप्ताहस्य शुभारम्भकार्यक्रमः भवभूतिप्रेक्षागारे समायोजितः। समारोहेऽस्मिन् परिसरस्य पूर्वप्राचार्याः

प्रो. विद्यानन्दझाः सारस्वतातिथिपदमलंकृतवन्तः, प्राचार्यैः प्रो. एम्. चन्द्रशेखरैः आध्यक्ष्यं विहितम्। व्याकरणविभागाध्यक्षाः प्रो. सुबोध-शर्ममहोदयाः स्वागतभाषणम्, कार्यक्रमरूपरेखाप्रस्तोता ज्योतिषविभागस्य डॉ. श्यामदेवमिश्रः च रूपकमाध्यमेन संस्कृतस्वरूपं निगदितवान्। सारस्वतोद्बोधने प्रो. झामहोदयेन एतादृशकार्यक्रमाणाम् आत्यन्तिकमाहात्म्यं प्रकटितम्।

तैः संस्कृतसाहित्यस्य गौरवशालिपरम्परा साभिप्रेरणं प्रकटिता। अध्यक्षीयोद्बोधने प्रो. एम्.चन्द्रशेखरमहोदयेन संस्कृत-शास्त्राध्यापनाध्ययनपरम्परायाः तत्सम्बद्धनिष्ठा-निरन्तरता- परिणामानां सुन्दरविश्लेषणं प्रस्तुतमिह। जैनदर्शनविभागस्य श्रीप्रतापशास्त्रिणा धन्यवादज्ञापनमभिव्यक्तम्। कार्यक्रमस्य संयोजनं ज्योतिषविभागस्य प्रो. हंसधरझामहाभागैः कृतम्।

संस्कृतसप्ताहस्य महोत्सवस्य अविरलधारायां सांस्कृतिककार्यक्रमाणां शृंखलायाञ्च अगस्तमासस्य १७ दिनाङ्के नाट्यानुसन्धानकेन्द्रस्य डॉ. सञ्जयद्विवेदी, श्रीमनोजपाटीदारश्च ससङ्गीतं संस्कृतगीतानि प्रस्तुतवन्तौ।

१९ दिनाङ्के षोडशसंस्कारनाटकस्य भवभूतिप्रेक्षागारे मञ्चनं जातम्। एतन्नाटकं वीणापाणिसंस्कृतसमितेः 'श्रीनाट्यम् – द ग्रुप ऑफ संस्कृत ड्रामा' इत्यस्य रङ्गकर्मिभिः मञ्चितम्। नाटकस्य नाट्यलेखकः डॉ. धर्मेन्द्रसिंहदेवः, निर्देशकः श्रीमनोजमिश्रश्च आस्ताम्। संस्कृत-हिन्दी-पञ्जाबी-आदिविविधभाषाणां माध्यमेन भारतीयसंस्कृतेः आधारभूतव्यवस्थायाः षोडशसंस्काराणां कलात्मकप्रस्तुतिना कार्यक्रमोऽयं संस्कृतनाट्यप्रयोगे नवाचार इव।

## डॉ. अशोकथपलियालानां सौप्रस्थानिकसमारोहः

अगस्तमासस्य १९ दिनाङ्के ज्योतिष-वास्तुशास्त्रयोः युवविदूषां डॉ. अशोकथपलियालमहावर्याणां सौप्रस्थानिककार्यक्रमः समायोजितः। समुपस्थितप्राध्यापकैः, विद्यार्थिभिः थपलियालमहोदयानां भाविजीवनाय उत्तमशुभकामनाः प्रार्थिताः। कार्यक्रमस्यास्य आध्यक्ष्यं प्रो. एम्. चन्द्रशेखरमहोदयैः आत्मीकृतम्।

## संस्कृतसप्ताहस्य समापनम्

अगस्तमासस्य २२ दिनाङ्के संस्कृतकविसमवायकार्यक्रमे प्राध्यापकैः, विद्यार्थिभिश्च स्वरचितकाव्यानां पाठः प्रस्तुतः। अपराह्णे संस्कृतसप्ताहमहोत्सवस्य समापनसमारोहः सम्पन्नः। समापनकार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृत-विश्वविद्यालयस्य कुलपतिचराः प्रो. मिथिलाप्रसादत्रिपाठिनः, सारस्वतातिथिरूपेण भोपालस्थस्य शासकीयसंस्कृतमहाविद्यालयस्य आचार्याः लक्ष्मीनारायणपाण्डेयाः, अध्यक्षरूपेण परिसरप्राचार्याः प्रो. एम्. चन्द्रशेखराश्च मञ्चं समलङ्कृतवन्तः। कार्यक्रमेऽस्मिन् परिसरेण डॉ. सुबोध-चौरसिया, डॉ. रामकुमारदेवलिया, प्रो. जनार्दनप्रसादपाण्डेयश्च संस्कृतभूषणोपधिना सम्मानिताः। समापनकार्यक्रमे डॉ. सनन्दनत्रिपाठी धन्यवादज्ञापनं प्रस्तुतवान्, डॉ. प्रदीपकुमारपाण्डेयश्च संचालकः आसीत्।

## राजभाषासमितेः निरीक्षणम्

अगस्तमासस्य ११ दिनाङ्के गृहमन्त्रालयस्य राजभाषाधिकारिणा परिसरस्य निरीक्षणं कृतम्। निरीक्षणदले श्रीहरीशचौहान-श्रीरघुवंशीमहोदययोः समुपस्थितिः प्राप्ता। चौहानमहोदयेन सह परिसरप्रचार्यास्य, समितिसदस्यानाञ्च वार्तापि जाता। अथ च अन्तर्जालपुटे राजभाषासम्बद्धपरिसरीयसूचनानां समर्पणस्य प्रक्रियापि प्रत्यक्षतः चर्चिता।

## संसदीया उपवेशनसमितिः

सितम्बरमासस्य शनिवासरे ०२ दिनाङ्के संसदीयसमीत्या सह भोपालस्थोच्चशैक्षिक- संस्थानां मुख्यतः विश्वविद्यालयानां कुलपतीनां, निर्देशकानां, मध्यप्रदेशसर्वकारस्य प्रतिनिधीनां च समुपस्थितिः उपवेशने अभवत्। मानवसंसाधनविकासमन्त्रालयस्य निर्देशने 'उच्चशिक्षाया गुणवत्ता, अन्यविषयाश्च' इत्यस्मिन् सन्दर्भे राष्ट्रियसंस्कृतसंस्थानस्यापि सहभागिता अभवत्। अस्मिन् कार्यक्रमे परिसरस्य प्रतिनिधिरूपेण डॉ. नीलाभतिवारी, श्रीसुमितसक्सेना च भोपालपरिसरस्य संस्कृतशिक्षायाः गुणवत्ताविषयकपक्षान् प्रस्तुतवन्तौ।

## त्रैमासिकफलित-ज्योतिषपरिचयपाठ्यक्रमः वास्तुशास्त्रपाठ्यक्रमश्च

सितम्बरमासस्य षष्ठे दिनाङ्के त्रैमासिकफलितज्योतिषपरिचयपाठ्यक्रमवास्तुशास्त्रपरिचय- पाठ्यक्रमयोः उद्घाटनसमारोहः सम्पन्नः। तत्र कार्यक्रमेऽस्मिन् अध्यक्षरूपेण परिसरप्राचार्याः प्रो.एम्.चन्द्रशेखरमहोदयाः, मुख्यातिथिरूपेण ज्योतिषविभागाध्यक्षाः प्रो.भारतभूषणमिश्रमहोदयाः सारस्वतातिथिरूपेण व्याकरणविभागाध्यक्षाः प्रो.सुबोधशर्ममहोदयाः, पाठ्यक्रमसमन्वयकरूपेण आचार्याः हंसधरझामहोदयाः, ज्योतिषपरिचय-पाठ्यक्रमस्य सहसमन्वयकाः डॉ.नीलमाधवदाशमहोदयाः, वास्तुशास्त्रपाठ्यक्रमस्य सहसमन्वयकाः डॉ. अवधेशकुमारश्रोत्रियमहोदयाश्च मञ्चं समलङ्कृतवन्तः। उद्घाटनावसरे परिसरप्राचार्यैः प्रो. एम्. चन्द्रशेखरमहोदयैः ज्योतिषशास्त्रस्य सामाजिकं शास्त्रीयं च महत्त्वं प्रतिपाद्य समाजे

ज्योतिषशास्त्रस्य प्रचाराय आह्वानं कृतम्। प्रो. हंसधरझामहोदयेन पाठ्यक्रमस्योपयोगिता प्रस्तुता प्रो. भारतभूषणमिश्रमहोदयेन धन्यवादज्ञापनं च कृतम्। अस्य कार्यक्रमस्य डॉ. भूपेन्द्रकुमारपाण्डेयः संचालकः आसीत्।



उद्घाटनं विद्धानः अतिथिवर्यः

### राधाकृष्णस्मृतिव्याख्यानमाला

सितम्बरमासस्य ०५ दिनाङ्के डॉ. राधाकृष्णस्मृतिव्याख्यानमालोपक्रमे शिक्षकदिवसावसरे समायोजिते कार्यक्रमे भोपालस्थस्य क्षेत्रीयशिक्षासंस्थानस्य सेवानिवृत्तशिक्षाविदां प्रो. रमाकर-रायजादामहाशयानां स्वव्याख्यानेन शिक्षकच्छात्राणां समक्षे डॉ. राधाकृष्णस्य जीवनस्य शिक्षायाश्च परिचयः प्रदत्तः। अथ च शिक्षकरूपेण वर्तमानशिक्षकाणां भूमिका तैः सरलसरस-रूपेण प्रस्तुता। कार्यक्रमेऽस्मिन् प्रो. भारतभूषणमिश्रमहोदयेन स्वागतभाषणं, डॉ. अशोक-कछवाहमहोदयेन धन्यवादज्ञापनञ्च प्रस्तुते। कार्यक्रमस्यास्य व्यवस्थितसञ्चालनं डॉ. सोमनाथ-साहूवर्येण विहितम्। परिसरस्य समस्तविद्यार्थिनां कृते कार्यक्रमोऽयम् अतीव उपकृतः।

### वार्षिकप्रतियोगिता

सितम्बरमासस्य ५ तः १० दिनाङ्कपर्यन्तं विभिन्नशैक्षिक-सांस्कृतिक-क्रीडाप्रतियोगिताः आयोजिताः। एताः प्रतियोगिताः विद्यार्थिनां चयनार्थम् एकलव्यपरिसरे आयोजिष्यमाणाय आगमियुवमहोत्सवाय जाताः। शैक्षिकप्रतियोगितानां संयोजकौ प्रो. हंसधरझा, डॉ. अर्चनादुबे च, सांस्कृतिकप्रतियोगितानां संयोजकाः डॉ. अशोककुमारकछवाहः, डॉ. अर्चनाचौहानः, डॉ. संगीतागुन्देचा चासन्। क्रीडाप्रतियोगितानां संयोजकौ डॉ. नरेशकुमारपाण्डेयः, डॉ. विवेकसिंहश्च आस्ताम्। प्रतियोगितासु ५७ विद्यार्थिनः युवमहोत्सवाय चिताः संजाताः।

### हिन्दी-पखवाड़ाकार्यक्रमस्य उद्घाटनसमारोहः

सितम्बरमासस्य १४ तः २८ पर्यन्तं हिन्दीपखवाड़ाकार्यक्रमस्यायोजनं कृतम्। अस्य कार्यक्रमस्य १४ दिनाङ्के आयोजिते उद्घाटनसमारोहे मुख्यातिथिः हिन्दीसाहित्यकारः श्री ध्रुवशुक्लः, विशिष्टातिथिः श्री उदयनवाजपेयी, सम्मानितातिथिः बी.एस्.एन्.एल्. मण्डलाधिकारी श्रीमनीषकुमारसोनी च समुपस्थिताः। कार्यक्रमाध्यक्षपदम् परिसरप्रचार्यः प्रो. एम्. चन्द्रशेखरः समलङ्कृतवान्। कार्यक्रमेऽस्मिन् श्रीध्रुवशुक्लः, श्री उदयनवाजपेयी, श्रीशशिकान्तमुद्गलश्च परिसरद्वारा नूतनपुरस्कारेण 'हिन्दीभूषणेन' विभूषिताः। डॉ. मंजूसिंहेन स्वागतवक्तव्यं, डॉ. विवेककुमारसिंहेन धन्यवादज्ञापनञ्च प्रस्तुते। कार्यक्रमस्य सफलसञ्चालनं हिन्दीपखवाड़ासंयोजिकया डॉ. अर्चनादुबेमहोदयया कृतम्।

### हिन्दी-पखवाड़ाकार्यक्रमस्य समापनसमारोहः

सितम्बरमासस्य २८ दिनाङ्के हिन्दीपखवाडाकार्यक्रमस्य समापनसमारोहः आयोजितः। अस्मिन् कार्यक्रमे प्रख्यातहिन्दीसाहित्यकारः श्रीराजेशजोशी मुख्यातिथिरूपेण, गृहमन्त्रालयाधीने राजभाषाधिकारी श्री हरीशचौहानः विशिष्टातिथिरूपेण च समुपस्थितौ। कार्यक्रमाध्यक्षपदं परिसरस्य प्रभारि- प्राचार्यः प्रो. भारतभूषणमिश्रेण समलङ्कृतम्। विशेषरूपेण अस्मिन् कार्यक्रमे जोशिमहोदयस्य काव्यपाठः सर्वैः आस्वादितः। डॉ. मंजूसिंहेन स्वागतवक्तव्यं, श्रीसुमितसक्सेनाद्वारा धन्यवादज्ञापनं च प्रस्तुते। कार्यक्रमस्य सफलसञ्चालनं डॉ. नितिनजैनेन कृतम्।

---



शिक्षकप्रशिक्षणवर्गोद्घाटनकार्यक्रमस्य दृश्यम्

## लखनऊपरिसरवार्ता

### शिक्षकप्रशिक्षणवर्गः भाषाबोधनवर्गश्च

राष्ट्रियसंस्कृतसंस्थानस्य संस्कृतभारत्याश्च तत्त्वावधाने एकस्य द्वादशदिवसीयावसीय-संस्कृतशिक्षकप्रशिक्षणवर्गस्य भाषाबोधनवर्गस्य च आयोजनं सञ्जातम्। कार्यक्रमस्यास्य उद्घाटनं जूनमासस्य तृतीयदिनाङ्के (०३.०६.२०१६) अभवत्। सरस्वत्याः पूजया माल्यार्पणेन च कार्यक्रमोऽयं समारब्धः। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण "रामकृष्णमिशन्" इति संस्थायाः स्वामिमुक्तानन्दमहोदयाः विराजमानाः आसन्। विशिष्टातिथिरूपेण समुपस्थितः आसीत् लखनऊनगरस्य महापौरः डॉ. दिनेशशर्ममहोदयः, वक्तृरूपेणासीत् संस्कृतभारत्याः क्षेत्रसङ्घटन-मन्त्री डॉ. सञ्जीवकुमारः। अध्यक्षः एवं वर्गाधिकारिरूपेण उपस्थिताः परिसरीयप्राचार्याः प्रो. सुरेन्द्रपाठकवर्याः आसन्। कार्यक्रमस्यास्य सञ्चालनं संस्कृतभारत्याः प्रान्तसङ्घटनमन्त्री डॉ.ओंकारनारायणदुबे-महोदयः अकरोत्। अन्ते धन्यवाद ज्ञापनं संस्कृतभारत्याः प्रान्ताध्यक्षः श्री शोभनलाल-उकीलमहोदयः कृतवान्। कार्यक्रमेऽस्मिन् लखनऊनगरस्य अन्येऽपि जनाः समुपस्थिताः आसन्।

द्वादशदिनेषु यावत् प्रशिक्षणं सामूहिकरूपेण गणरूपेण च प्रचलितम्। प्रशिक्षणेऽस्मिन् प्रतिदिनं विभिन्नप्रकारेण शिक्षणं प्रदीयते स्म। तत्र प्रधानतया संस्कृतसम्भाषण-व्याकरण-गीत-क्रीडादीनां शिक्षणं प्रदत्तम्। वर्गेऽस्मिन् २० प्रशिक्षकाः, १७५ छात्राः भागम् अगृह्णन्। तेषु पुरुषाः १००, महिलाः ७५ च। प्रायः सर्वेषामपि द्वादशदिनानि यावत् वर्गस्थले एव भोजनादिव्यवस्था कल्पिता। छात्राः अपि द्वादशदिनानि यावत् संस्कृतसम्भाषणे सानन्दं भागमगृह्णन्।

प्रशिक्षणवर्गस्यास्य समापनकार्यक्रमः त्रयोदशदिनाङ्के सायं चतुर्वादने सरस्वत्याः अर्चनेन प्रारम्भोऽभवत्। कार्यक्रमस्य मुख्यातिथिरूपेण वरिष्ठपत्रकारः श्री राजनाथसिंह(सूर्य)- महोदयः उपस्थितः आसीत्। मुख्यवक्तृरूपेण संस्कृतभारत्याः अखिलभारतसम्पर्कप्रमुखः डॉ. श्रीशदेवपुजारिमहोदयः आसीत्। कार्यक्रमस्यास्य अध्यक्षत्वेन परिसरीयप्राचार्यः प्रो. सुरेन्द्रपाठकवर्यः उपस्थितः। द्वादशदिवसीयकार्यक्रमस्य पूर्णविवरणं प्रस्तुतवान् संस्कृतभारत्याः प्रान्तसङ्घटनमन्त्री डॉ. ओंकारमहोदयः। कार्यक्रमस्य सञ्चालनं परिसरीयच्छात्रेण आनन्दमोहनेन कृतम्। राष्ट्रगीतेन समाप्तोऽयं कार्यक्रमः।

### सत्रारम्भकार्यक्रमः

परिसरे सत्रारम्भमुपलक्ष्य सरस्वतीपूजाकार्यक्रमस्य समायोजनं कृतम्। कार्यक्रमोऽयं परिसरप्राचार्येण प्रो.सुरेन्द्रपाठकवर्येण सरस्वत्याः पूजार्चनया च प्रारम्भः कृतः। कार्यक्रमेऽस्मिन् सर्वे प्राध्यापकाः, शोधच्छात्राः, कर्मचारिणश्च उपस्थिताः आसन्। कार्यक्रमे पौरोहित्यकार्यं वेदविभागस्य प्राध्यापकेन डॉ. नीरजतिवारिमहोदयेन कृतम्। व्याकरणविभागाध्यक्षः प्रो.भारतभूषणत्रिपाठिमहोदस्य मार्गनिर्दशेन कार्यक्रमोऽयं सुसम्पन्नः जातः।

### योगदिवसः

परिसरे पतञ्जलियोगसंस्थानयोश्च सम्मिलिततत्त्वावधाने २१ जून २०१६ तमे प्रातः सप्तवादने योगदिवसकार्यक्रमस्य आयोजनं सञ्जातम्। कार्यक्रमेऽस्मिन् सर्वेऽपि परिसरीयप्राध्यापकाः छात्राश्च प्राचार्येण सह समुपस्थिताः आसन्, एवं पतञ्जलियोगसंस्थानस्य सर्वेऽपि कार्यकर्तारः अपि भागमगृह्णन्। कार्यक्रमस्यस्य समापनं सर्वेषां योगाभ्यासकरणद्वारा समाप्तम्।

### परिसरे प्रवेशप्रक्रिया

राष्ट्रियसंस्कृतसंस्थानस्य, लखनऊपरिसरे प्राक्-शास्त्रि, शास्त्रि, आचार्यकक्ष्यासु नवीनच्छात्राणां प्रवेशप्रक्रियामुद्दिश्य विविधसमाचारपत्रेषु विज्ञापनं जूनमासे प्रदत्तम्। तदनुसारेण पूर्वसूचितकक्षाणां प्रवेशप्रक्रिया परिसरीयप्राध्यापकानां समित्याधारेण छात्राणां परीक्षणं, प्रवेशार्हतां च विज्ञाय छात्राणां प्रवेशप्रक्रिया जुलाई-अगस्तमासद्वये प्रचलिता आसीत्। तथैव परिसरे विद्यमानस्य शिक्षाविभागेऽपि पूर्वनिर्धारिता CSST परिक्षाधारेण मुख्यकार्यलयद्वारा प्रेषितसूच्याधारेण च छात्राणां प्रवेशप्रक्रिया जुलाई-अगस्तमासद्वये समुपन्ना।

### परिसरे आयोजिता पुस्तकप्रदर्शिनी

जुलाईमासस्य २८ दिनाङ्के लखनऊपरिसरेऽस्मिन् गायत्रीपरिवारपक्षतः एकस्याः पुस्तकमेलायाः आयोजनं जातम्। तस्यां मेलायां सर्वे छात्राः प्राध्यापकाश्च पुस्तकानां क्रयणम् अवलोकनं च कृतवन्तः।

### वाग्वर्धिनीसभायाः उद्घाटनम्

सभायाः उद्घाटनं परिसरप्राचार्येण प्राध्यापकैः सह सरस्वत्याः अर्चनया दीपज्वालनेन च कृतम्। अस्याः सभायाः सञ्चालनं व्याकरणविभागीयः प्राध्यापकः डॉ. यदुवीरस्वरूपब्रह्मचारिमहोदयः अकरोत्। अस्यां सभायां विंशत्यधिकप्रतिभागिनः भागमगृह्णन्। सर्वे छात्राः स्व-स्वनिर्धारितविषयेषु भाषणं प्रदत्तवन्तः। अस्य कार्यक्रमस्य संयोजनस्य दायित्वं व्याकरणविभागीयप्राध्यापकेन श्री प्रमोदकुमारशुक्लमहोदयेन निरूढम्। कार्यक्रमस्य समापनं शान्तिमन्त्रेण अजायत।

### स्वातन्त्र्यदिवसाचरणम्

स्वातन्त्र्यदिवसं पुरस्कृत्य प्रातः ७.३० वादनतः ९.०० वादनं यावत् परिसरीयप्राचार्यः, सर्वेऽपि प्राध्यापकाः, छात्राः, कर्मचरिणश्च परिसरात् "प्रभातयात्रा" नाम्ना नगरे शोभायात्राम् अकुर्वन्। ततः परं परिसरीयप्राङ्गणे प्रातः ९.३० वादने ध्वजोत्तोलनकार्यक्रमः सम्पन्नः। तदनन्तरं स्वातन्त्र्यदिवसं पुरस्कृत्य परिसरच्छात्रेभ्यः विविधस्पर्धाः समायोजिताः। यथा - भाषणप्रतियोगिता, निबन्धप्रतियोगिता, रङ्गोलीप्रतियोगिता, चित्रप्रतियोगिता, एकलपात्राभिनयप्रयोगितादयः। एतासु प्रतियोगितासु परिसरीयच्छात्राः सर्वऽपि सोत्साहं भागमगृह्णन्।



शोभायात्रायां निरताः छात्राः

## परिसरीयस्वच्छताभियानम्

परिसरेऽस्मिन् अगस्तमासस्य २० दिनाङ्कादारभ्य २४ दिनाङ्कं यावत् 'परिसरस्वच्छाताभियानकार्यक्रमः' समायोजितः। कार्यक्रमेऽस्मिन् परिसरप्राचार्यः, सर्वेप्राध्यापकाः, छात्राः, कर्मचारिणश्च सोत्साहं भागमगृह्णन्। तत्र विशिष्य परिसरीयप्रशासनभवनस्य, कक्षाप्रकोष्ठानां, छात्रावासभवनानां, क्रीडाप्राङ्गणस्य च स्वच्छातामकुर्वन्।

## विश्वविद्यालयानुदानायोगसमित्या निरीक्षणम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरेऽस्मिन् २५ दिनाङ्कादारभ्य २७ दिनाङ्कं यावत् विश्वविद्यालयानुदानायोगसमित्या निरीक्षणं सम्पन्नम्। परिसरस्य निरीक्षणार्थं सप्तजनानाम् एकः, गणः २५ दिनाङ्के समागतः आसीत्। तत्र प्रो.पङ्कजजानीमहोदयानां साध्यक्षे डॉ.श्रीमती उमावैद्या, प्रो.उमाशङ्करशुक्लः, प्रो. श्रीमती मञ्जुलादेवी, डॉ.श्रीमती पूर्णिमा पत्तनशेट्टी, डॉ.श्रीमती उर्मिलादेवी इत्यादयः गणसदस्याः आसन्। एते परिसरस्य शैक्षणिकगतिविधीनां, छात्रावासव्यवस्थायाः, पाठ्यसहगामिक्रियाणां च निरीक्षणं कृतवन्तः। २७ दिनाङ्के सायं त्रिवादने समापनकार्यक्रमः समयोजितः। कार्यक्रमेऽस्मिन् सर्वे प्राध्यापकाः, छात्राः, कर्मचारिणश्च समुपस्थिताः।



संस्कृतसप्ताहोत्सवकार्यक्रमस्य दृश्यम्

## संस्कृतसप्ताहकार्यक्रमः

परिसरेण षोडशाधिकद्विसहस्रतमवर्षस्य अगस्तमासस्य सप्तदशदिनाङ्कतः नवविंशति-दिनाङ्कं यावत् संस्कृतसप्ताहरूपेणाचरितम्।

उद्घाटनकार्यक्रमे मुख्यातिथिरूपेण समुपस्थिताः प्रो.रामनारायणमिश्रमहोदयाः, विशिष्टातिथिरूपेण डॉ. श्रीमती साधनामिश्रामहोदयाः, सारस्वतातिथिरूपेण डॉ.उमारमणझा-महोदयाः तथा च अध्यक्षरूपेण आसन् परिसरप्राचार्याः प्रो.सुरेन्द्रपाठकवर्याः। संस्कृतसप्ताहावसरे विविधाः प्रतियोगिताः आयोजिताः तद्यथा – गीतप्रतियोगिता, भाषणप्रतियोगिता, निबन्धन-प्रतियोगिता, अन्त्याक्षरीप्रतियोगिता च।

कार्यक्रमस्य समापनम् अगस्तमासस्य नवविंशतिदिनाङ्के सायं त्रिवादने जातम्। समापनकार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण प्रो. रामपूजनपाण्डेयमहोदयः, विशिष्टातिथिरूपेण प्रो.आजादमिश्रमहोदयः, अध्यक्षः प्रो.सुरेन्द्रपाठकमहोदयः च आसन्। सम्पूर्णस्यास्य कार्यक्रमस्य सञ्चालनं संयोजनञ्च व्याकरणविभागाध्यक्षेण प्रो. भरतभूषणत्रिपाठिमहोदयेन कृतम्।

## उपाकर्मसंस्कारकार्यक्रमः

अगस्तमासस्य अष्टादशदिनाङ्के उपाकर्मकार्यक्रमः आयोजितः। कार्यक्रमेऽस्मिन् आचार्यरूपेणासीत् डॉ.नीरजतिवारी। कार्यक्रमे परिसरप्राचार्यः, प्राध्यापकाः छात्राश्च पूर्णतया भागमगृह्णन्।




हिन्दीपखवाडाकार्यक्रमे अतिथीनां सम्माननम्

## हिन्दी पखवाड़ा-समाचरितः

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरेऽस्मिन् सितम्बरमासस्य चतुर्दशदिनाङ्के हिन्दी-पखवाड़ायाः आयोजनं कृतम्। कार्यक्रमस्यारम्भः सरस्वत्याः अर्चनया वैदिक-लौकिकमङ्गला-चरणेन च अभवत्। कार्यक्रमे मुख्यवक्तृरूपेण प्रो.विनयकुमारमिश्रमहोदयाः समुपस्थिताः आसन्। वैदिकमङ्गलाचरणं वेदविभागस्य प्राध्यापकः डॉ.नीरजतिवारी तथा लौकिकमङ्गलाचरणं शोधच्छात्रः शैलेशकुमारतिवारी च अकरोत्। स्वागतभाषणं हिन्दीसङ्कायाध्यक्षेण प्रो.शिशिर-कुमारपाण्डेयमहोदयेन कृतम्। कार्यक्रमस्यास्य अध्यक्षरूपेण परिसरस्य प्राचार्याः प्रो. सुरेन्द्र पाठकमहोदयाः समुपस्थिताः आसन्।

कार्यक्रमेऽस्मिन् विविधाः प्रतियोगिताः समायोजिताः आसन्। यथा – निबन्ध-अन्त्याक्षरीनिबन्धलेखनादिप्रतियोगिताः सञ्चालिताः। एतासु प्रतियोगितासु सर्वविभागीयच्छात्राः भागग्रहणं कृतवन्तः। कार्यक्रमोऽयं १४.०९.२०१६ तः २७.०९.२०१६ पर्यन्तं प्रचालिताः। कार्यक्रमस्य सञ्चालनम् अर्थशास्त्रप्राध्यापकः डॉ.एस्.पि.सिंह-महोदयः कृतवान्। कार्यक्रमस्य समापनं २७.०९.१६ दिनाङ्के अभवत्। कार्यक्रमेऽस्मिन् मुख्यातिथिः महन्त देव्यागिरिमहाभागा (मनकामेश्वरमन्दिरस्य अध्यक्षः), विशिष्टातिथिः डॉ. सदाबीहारि-




हिन्दीपखवाडाकार्यक्रमस्य दृश्यम्

साहुमहोदयः, सभाध्यक्षः प्रो. सुरेद्रपाठकमहोदयः, कार्यक्रमस्य संयोजकः प्रो. शिशिरकुमारपाण्डेयमहोदयः च आसीत्। कार्यक्रमस्यास्य सञ्चालनं डॉ.कवितासिसारियामहाभागया कृतम्। कार्यक्रमेऽस्मिन् सर्वे प्राध्यापकाः, छात्राः कर्मचारिणश्च समुपस्थिताः आसन्।

### अखिलभारतीय-पाली-संस्कृतच्छाया-संशोधन-सम्पादनकार्यशाला

परिसरस्य बौद्धविभागस्य पालि-अध्ययनकेन्द्रे दशदिवसीय २०.०९.२०१६ तः २९.०९.२०१६ यावत् अखिलभारतीय पालि-संस्कृतच्छाया-संशोधनसम्पादनकार्यशालायाः उद्घाटनं लखनऊपरिसरे सञ्जातम्। सितम्बरमासस्य विंशतिदिनाङ्के बुद्धवन्दनया कार्यक्रमस्य समुद्घाटनं जातम्। कार्यक्रमेऽस्मिन् अतिथीनां स्वागतभाषणं बौद्धविभागस्य विभागाध्यक्षेण प्रो.विजयकुमारजैनवर्येण कृतम्। कार्यक्रमे प्रो.उमाशंकरव्यास-प्रो.संघसेनसिंह-प्रो.जानकीप्रसादद्विवेदि-प्रो. प्रद्युम्नदूबे-प्रो.रामनक्षत्रप्रसाद-प्रो.आजादमिश्रादिभिः विशेषोद्बोधनं प्रदत्तम्। कार्यक्रमे अन्येऽपि मान्याः प्रो.रामसागरमिश्र-प्रो.वृषभकुमारजैन-डॉ.कमलकुमारजैना आसन्। कार्यक्रमस्य अध्यक्षता परिसरप्राचार्येण प्रो.सुरेन्द्रपाठकवर्येण कृतम्। धन्यवादभाषणं विभागप्राध्यापकः डॉ.गुरुचरणासिंहनेगीमहोदयः अकरोत्। कार्यक्रमस्य सञ्चालनस्य दायित्वमूढवान् पालिविभागस्य प्रदीपशर्मा लुइटेल। कार्यक्रमस्यान्ते स्वस्तिवाचनं विभागीयच्छात्राः कृतवन्तः। अस्याः कार्यशालायाः समापनं २९.०९.२०१६ दिनाङ्के सम्पन्नम्।

## जयपुरपरिसरवार्ता

### एकविंशतिदिवसात्मकः भाषाबोधनवर्गः समनुष्ठितः

राष्ट्रियसंस्कृतसंस्थानस्य शिक्षाशास्त्रविभागस्य अभिनवपाठ्यक्रमस्य अनुपालनायां अगस्तमासस्य प्रथमदिनाङ्के एकविंशतिदिवसात्मकस्य भाषाबोधनवर्गस्य समारम्भः संजातः। तत्र उद्घाटनसत्रे अध्यक्षत्वेन परिसरस्यास्य प्राचार्यमहोदयानां गरिमपूर्णोपस्थितिरभवत्। छात्रेभ्यः आशीर्वचांसि वितीर्य तैरवोचि यत् सर्वैरपि छात्रैः महान् श्रमः समाचरणीयः, येन परिसरेऽस्मिन् संस्कृतमयवातावरणस्याभिवर्द्धनं भवेत्। ततश्चोद्घाटनसत्रात्परं लिखितपरीक्षणेन समारब्धस्यास्य भाषाबोधनवर्गस्य शिक्षणसत्राणि अनुष्ठितानि।

तत्र हि उद्बोधनकक्षासु विभागस्य वरिष्ठाचार्यैः शिक्षासन्दर्भिकविषयेषु छात्राणामव- धानमाकृष्टम्, यथा हि – किन्नाम अध्यापकत्वम्, संस्कृतभाषाशिक्षकः, अध्यापकशिक्षायाः स्वरूपं समस्याः सम्भावनाश्च, संस्कृतशिक्षायाः महत्त्वं समस्याः सम्भावनाश्च, राष्ट्रियैकतायै संस्कृतस्य आवश्यकत्वमित्यादयः। छात्रेष्वतीव प्रियं संस्कृतचित्रदर्शनं प्रत्यहं समायोजितम्। तत्र हि दृश्य-श्रव्योपकरणमाध्यमेन संस्कृतमयवातावरणस्योत्पादनाय प्रयासो विहितः। तत्र संस्कृतकथादशकम्, संस्कृतस्वाध्यायः, संस्कृतशिक्षिका, संस्कृतनाट्यविंशतिका, संवादमाला, संस्कृतभाषाशिक्षणमित्यादयः सान्द्रमुद्रिकाः प्रामुख्येण प्रदर्शिताः।

संस्कृतसम्भाषणशिबिरपद्धतिमाश्रित्य संस्कृतसम्भाषणकक्षासु संस्कृतसम्भाषणं सम्भाषणशिक्षणं चेति द्वौ विषयौ प्रामुख्येण अनुष्ठितौ। उपान्तिमदिवसे प्राप्तज्ञानस्य पुनःस्मारणसत्रस्य आयोजनमप्यजायत।

### शिक्षाशास्त्रिद्वितीयवर्षच्छात्राणाम् अन्तःवृत्याभ्यासः

राष्ट्रियाध्यापकशिक्षापरिषद्-द्वारा निर्धारितानां नूतननियमानामनुगुणं शिक्षाशास्त्रिद्वितीयवर्षस्य छात्राणाम् अन्तःवृत्याभ्यासः कार्यक्रमः अगस्तमासस्य चतुर्थदिनाङ्के समारब्धः। मासचतुष्टयात्मके अभ्यासेऽस्मिन् प्रशिक्षणार्थिनः विद्यालयसम्बद्धगतिविधीनामवलोकनेन सह निर्धारितविषयाणां शिक्षणं करिष्यन्ति। कार्यक्रमस्यास्य समापनं नवम्बरमासे भविष्यति।

### स्वतन्त्रतादिवसमारोहः

भारतराष्ट्रस्य स्वतन्त्रदिवसः परिसरप्राचार्याणां डॉ. प्रकाशपाण्डेयमहाभागानामाध्यक्षे, प्रो. गजेन्द्रशर्मवर्य्याणां संयोजकत्वे हर्षोल्लासपूर्वकं समनुष्ठितः। राष्ट्रध्वजारोहणात्परं समारोहेऽस्मिन् परिसरप्राचार्यः डॉ. प्रकाशपाण्डेयमहोदयः आध्यक्षं निर्वहन् आभाषत यत् स्वतन्त्रतान्दोलने संस्कृतज्ञानां महती भूमिका आसीत्। पुनश्च इदानीमपि राष्ट्रियैकतायै संस्कृतम् अत्यन्तमुपकारि वर्तते।

### संस्कृतसप्ताहः

परिसरे संस्कृतसप्ताहः १६ अगस्त तः २३ अगस्त, २०१६ पर्यन्तं समनुष्ठितः उद्घाटनसत्रं परिसरप्राचार्याणामाध्यक्षे, जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षचराणां डॉ. लम्बोदरमिश्रमहोदयानां मुख्यातिथित्वे सुसम्पन्नम्। संस्कृतसप्ताहे परिसरच्छात्राः विभिन्नासु संस्कृतप्रतियोगितासु भागं गृहीतवन्तः।



पुस्तकस्य लोकार्पणं विदधानाः अतिथयः प्राचार्यश्च

## तिरङ्गायात्रा

अगस्तमासस्य त्रयोविंशदिनाङ्के परिसरप्राचार्यस्य संरक्षणे परिसर-शिक्षकाणाञ्च मार्गदर्शने परिसरच्छात्रैः समीपवर्तिनि क्षेत्रे 'तिरङ्गायात्रा' विहिता।



शोभायात्रायाः एकं दृश्यम्

## शिक्षकदिवससमारोहः

शिक्षकदिवसमुपलक्ष्य परिसरे शिक्षकदिवससमारोहः आयोजितः। सितम्बरमासस्य पञ्चमे दिनाङ्के डॉ. राधाकृष्णन्-महोदयानां जन्मदिवसरूपेण समायोजिते शिक्षकदिवससमारोहे परिसरस्य सर्वदा सहयोगं कृतवतां विभिन्न-विद्यालयानां प्राचार्याणां सम्माननं, परिसरप्राचार्याणां डॉ. प्रकाशपाण्डेयवर्य्याणां, कार्यक्रमसंयोजकानां शिक्षाशास्त्रविभागाध्यक्षाणां प्रो. वाई.एस्. रमेशमहोदयानां च गरिममयसमुपस्थितौ जातम्। कार्यक्रमेऽस्मिन् शिक्षाशास्त्रिच्छात्रैः संस्कृत-नाटकस्याऽपि मञ्चनं कृतम्।

## वार्षिकक्रीडास्पर्धा

परिसरस्य वार्षिकक्रीड़ास्पर्द्धानामायोजनं शारिरिकशिक्षाविभागस्य प्रो. गजेन्द्रप्रकाशशर्ममहोदयस्य, प्रो. ओमप्रकाशभड़ानामहोदयस्य च संयोजकत्वे ८ सितम्बर २०१६ तः १६ सितम्बर २०१६ पर्यन्तमभवत्। क्रीड़ास्पर्द्धासु योगासनम्, मल्लयुद्धम्, बैडमिन्टन्, धावनम्, उच्चकूर्दनम्, लम्बकूर्दनम्, हस्तकन्दुकम्, कबड्डी, इत्यादिषु प्रतियोगितासु छात्राः सोत्साहं भागं गृहीतवन्तः।

## शिक्षाशास्त्रि-शिक्षाचार्यच्छात्रेभ्यः सामग्रीवितरणम्

परिसरस्य शिक्षाशास्त्रविभागे प्रशिक्षणरतेभ्यः–शिक्षाशास्त्रिप्रथमवर्षीय–शिक्षाचार्यप्रथम-वर्षीयच्छात्रेभ्यः प्रशिक्षणापेक्षसामग्र्याः वितरणं कृतम्। तत्र प्रामुख्येन शब्दकोशः, सन्धि-समास-कारक-पुस्तकानि, स्यूतः, मार्जकः, संकेतिका, अङ्कनी, वर्णाः, लपेटफलकम्, पञ्जिकाः, आलेखपत्राणि इत्यादयः वितरिताः। सामग्रीवितरणसमये शिक्षाशास्त्रविभागाध्यक्षेण अवोचि यत् एतेषामुपकरणानां सम्यक् प्रयोगाय सिद्धाः भवेयुः। एतेषामुपकरणानां प्रयोगेण शिक्षणं रुचिकरं प्रभावपूर्णं च कर्तुं भवतां प्रशिक्षणं प्रदर्शनञ्च विद्यालयेषु भविष्यति इति।

## शिक्षाशास्त्रिच्छात्राणां विद्यालयाबोधः

शिक्षाशास्त्रिप्रथमवर्षे प्रशिक्षणरतानां प्रशिक्षणार्थिनां विद्यालयाबोधकार्यक्रमः नगरस्य द्वादशविद्यालयेषु विभागाध्यक्षाणां प्रो. वाई.एस्. रमेशमहोदयानां निर्देशने, अन्येषां शिक्षकाणाञ्च पर्यवेक्षणे १६ सितम्बरतः ३० सितम्बर, २०१६ पर्यन्तम् अभवत्। प्रशिक्षणार्थिनः विद्यालयोद्घाटनतः सम्पूर्तिपर्यन्तं विद्यालयेषु स्थित्वा विद्यालयाभिलेखानां ज्ञानं पर्यवेक्षकाणां मार्गदर्शने प्राप्तवन्तः, विद्यालयगतिविधीनां निरीक्षणञ्च कृतवन्तः।

## दशोत्तरैकशतस्य संस्कृतसम्भाषणशिबिराणामायोजनम्

शिक्षाशास्त्रविभागीयैः शिक्षाशास्त्रि-शिक्षाचार्यप्रथमवर्षीयच्छात्रैः विभिन्नेषु विद्यालयेषु आहत्य दशोत्तरैकशतस्य संस्कृतसंभाषण-शिबिराणामायोजनं मार्गदर्शकशिक्षकाणां सान्निध्ये कृतम्। एतेषु शिबिरेषु सहस्राधिकजनाः लाभान्विताः अभवन्। संस्कृतभारत्याः शिबिरप्रणाल्या सरलसंस्कृतस्य प्रयोगं कृत्वा प्रतिनित्यं एकहोरात्मके काले २० सितम्बरतः ३० सितम्बर २०१६ पर्यन्तं संचालितेषु शिबिरेषु आगताः छात्राः संस्कृतस्य व्यावहारिकप्रयोगम् आरब्धवन्तः।

## हिन्दीदिवसः

सितम्बरमासस्य चतुर्दशे दिनाङ्के हिन्दीदिवसमुपलक्ष्य परिसरे बहवः कार्यक्रमाः अभवन्। अवसरेऽस्मिन् संस्थानस्य मुम्बईपरिसरप्राचार्यः प्रो. सुदेशकुमारशर्मा हिन्दीभाषायाः वर्धमानां वैश्विकशक्तिं निरूपितवान्। तेन अवोचि यत् अद्यत्वे भारतस्य आर्थिकप्रगत्या सह विश्वस्मिन्नपि विश्वे हिन्दीभाषायाः अपि सम्मानं वर्धमानमस्ति। समारोहात्परं विद्यार्थिनां कृते वाद-विवादस्पर्धा, निबन्धलेखनमित्यादीनां प्रतियोगितानां समायोजनमभवत्।

सितम्बरमासस्य त्रयोविंशे दिनाङ्के परिसरस्य व्याकरणविभागे व्याकरणपरिषदः उद्घाटनं जातम्। अस्यां परिषदि छात्राध्यक्षत्वेन आचार्यद्वितीयवर्षस्य केशवनाथझा, उपाध्यक्षत्वेन आचार्यप्रथमवर्षस्य कविता, सचिवत्वेन शास्त्रितृतीयवर्षस्य आशीषशर्मा, सहसचिवत्वेन शास्त्रिद्वितीयवर्षस्य संघमित्राव्यासः सयोजकत्वेन आचार्यद्वितीयवर्षस्य योगेशकुमारः, कोषाध्यक्षत्वेन आचार्यद्वितीयवर्षस्य श्यामसुन्दशर्मा च चितः। एतेषां चयनं प्रतिशताङ्कानामाधारेण जातम्। अत्र विभागीयाः प्राध्यापकाः अपि उपस्थिताः आसन्।

## क.जे.सोमैयासंस्कृतविद्यापीठवार्ता

### सत्रारम्भः

ग्रीष्मकालिकविरामानन्तरं परिसरीयाध्यापकानां छात्राणां च कार्यारम्भः जून्-मासस्य १६ दिनाङ्कतः अभूत्। सर्वेऽप्यध्यापकाः तत्तद्विभागीयकार्याणि समरप्सत। संविदाध्यापकानामपि पुनर्नियुक्तिं २० दिनाङ्कतः तेषां कार्यकौशलमाधारीकृत्य संस्थानमकरोत्।

### अन्ताराष्ट्रिययोगदिवसः



योगासने निरताः छात्राः अध्यापकाश्च

राष्ट्रियसंस्कृतसंस्थानस्य क.जे.सोमैयासंस्कृतविद्यापीठे २०१६ जूनमासस्य २१ तमे दिनाङ्के मङ्गलवासरे प्रातः १०.०० वादनतः ०१-४० पर्यन्तम् अन्ताराष्ट्रिययोगदिवसः समाचरितः। परिसरप्राचार्यस्य प्रो. एम्. चन्द्रशेखरवर्यस्य आध्यक्ष्ये डॉ. देवदत्तसरोदेमहोदयः कार्यक्रमं समायोजयत्।

परिसरीयच्छात्राः शोधच्छात्रस्य श्रीमतो रविकुमारस्य निर्देशने भारतसर्वकारस्य आयुष-मन्त्रालयेन निर्दिष्टं (CYP) योगाभ्यासम् अकार्षुः। अनन्तरं "योगश्चित्तवृत्तिनिरोधः" इति योगसूत्रमनुसृत्य भाषणप्रतियोगिता समायोजिता। परिसरीयच्छात्राः प्रतियोगितायां भागमगृह्णन्। शशिकान्तमिश्रः प्रथमं, श्री योगेन्द्रकुमारः द्वितीयं, प्रियंकाथापा तृतीयं च पुरस्कारं प्राप्नुवन्। भाषणप्रतियोगितायां डॉ. कुमारः, डॉ. आशीषकुमारचौधरी, डॉ. एम्. सुदर्शनचिपळूणकरश्च प्राध्यापकाः निर्णायकाः आसन्। श्रीमान् सत्यनारायणः शोधच्छात्रः "संस्कृतमाध्यमेन योगः" इत्यमुं विषयमधिकृत्य भाषणमदात्।

समारोपकार्यक्रमे परिसरप्राचार्यस्याध्यक्ष्ये सारस्वातिथिः व्याकरणविभागाध्यक्षः प्रो. प्रकाशचन्द्रः योगस्य प्रायोगिकप्रसक्तिं निरदिशत्। मुख्यवक्ता डॉ. देवदत्तसरोदे तत्त्वं संस्कृतलोके तद्वैशिष्ट्यं च प्रत्यापादयत्। परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरवर्यः भाषण-प्रतियोगिताविजेतृभ्यः पुरस्कारान् वितीर्य योगदिवसवैशिष्ट्यं समक्षिपत्। योगसम्बद्धं ध्यानरहस्यमिति चलचित्रं च सभायां डॉ. देवदत्तसरोदे प्रादर्शयत्।

डॉ. राकेशकुमारजैनः धन्यवादमज्ञापयत्। डॉ. नारायणन् ई. आर्. कार्यक्रमं समचालयत्। सर्वे सम्भूय शान्तिमन्त्रेण सभाकार्यक्रमं समापयन्।

### गुरुपूर्णिमाकार्यक्रमः



गुरुपूर्णिमाकार्यक्रमे मञ्चे विराजमानाः आचार्याः

भारतीयपरम्परानुसारं विद्यापीठस्य छात्राः गुरुपूर्णिमामहोत्सवं समनुष्ठितवन्तः। अस्मिन् अवसरे छात्राः वैदिकमङ्गलेन समारभ्य दीपप्रज्वालनं गुरुभिः कारयित्वा सभाकार्यक्रमं समचालयन्। तत्रादौ छात्राः गुरुवन्दनं विधाय केचन गुरुपूर्णिमासम्बद्ध - स्वस्वविचारान् प्रत्यपादयन्। कार्यक्रमेऽस्मिन् परिसरप्राचार्याणां प्रो. एम्. चन्द्रशेखरवर्याणामाध्यक्ष्ये प्रो. सुदेशकुमारशर्ममहाभागाः सारस्वतातिथिरूपेण, प्रो. प्रकाशचन्द्रमहोदयाः अभ्यागतरूपेण, शिक्षाशास्त्रविभागाध्यक्षाः प्रो. मदनमोहनझावर्याः अतिथिरूपेण अन्येऽध्यापकाश्च समुपस्थाय सर्वान् छात्रान् स्वाशीर्भिः अन्वगृह्णन्। कार्यक्रमोऽयम् सम्पूर्णतया विद्यापीठीयच्छात्रैः समायोजि। सञ्चालनमस्य श्रीमान् शशिकन्तमिश्रोऽकरोत्। पूर्णमिदमिति शान्तिमन्त्रेण कार्यक्रमोऽयं समाप्तिमगात्।

### शिक्षाशास्त्रिसत्रारम्भः



शिक्षाशास्त्रिकक्षासत्रारम्भस्य एकं दृश्यम्

विद्यापीठीयशिक्षाशास्त्रविभागे वर्षद्वयस्य शिक्षाशास्त्रिसत्रारम्भकार्यक्रमः १२.०७.२०१६ दिनाङ्के समनुष्ठितः। कार्यक्रमस्यास्य अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरवर्यः अतिथिरूपेण व्याकरणविभागाध्यक्षः प्रो. प्रकाशचन्द्रवर्यः विशिष्टातिथिरूपेण प्रो. सुदेशकुमार-शर्मवर्यः शिक्षाशास्त्रविभागाध्यक्षः प्रो. मदनमोहनझावर्यश्च उपस्थाय छात्राध्यापकान् राष्ट्रविकासे शिक्षकाणां भूमिकाम् उपावर्णयत्। कार्यक्रमस्य सञ्चालनं डॉ. कुमारः अकरोत्।

## शिक्षाशास्त्रविभागीयभाषाबोधनवर्गः शिबिरञ्च

शिक्षाशास्त्रविभागे नवागतानां छात्राणां संस्कृतभाषाकौशलवर्धनाय भाषाबोधनवर्गः संस्कृतशिबिरं च समायोजितम्। कार्यक्रमस्यास्य समुद्घाटनकार्यक्रमः जुलैमासस्य १८ दिनाङ्के जातः। अस्मिन् सन्दर्भे विभागाध्यक्षः प्रो. मदनमोहनझावर्यः वरिष्ठप्राध्यापकः डॉ. देवदत्तसरोदेवर्यश्च समुपस्थाय संस्कृताध्ययनमहत्त्वं समुपावर्णयत्। तत्र कुमारी मुग्धादाते संस्कृतभारतीपक्षतः समागत्य १० दिनात्मकशिबिरं समचालयत्। कार्यक्रमसञ्चालनं डॉ. कुमारः कृतवान्। शिबिरसमापनं २८ दिनाङ्के सञ्जातः। तस्मिन् सन्दर्भे संस्कृतभारतीकार्यकर्त्री श्रीमती अर्चना कतिरा समुपस्थिता आसीत्। समापनकार्यक्रमं छात्राः एव सञ्चालितवन्तः। अपरस्मात् दिनात् विभागीयाध्यापकाः भाषाबोधनवर्गस्य पाठ्यक्रमानुसारं कक्षाः चालयन्तः सन्ति।

## नवागतानां प्राचार्याणां स्वागतं वाग्वर्धिनीपरिषदुद्घाटनञ्च

प्रतिवर्षमिवास्मिन् वर्षेऽपि परिसरेऽस्मिन् विशेषतः शिक्षाविभागे छात्राणां वाग्वर्धना- भ्यासार्थं वाग्वर्धिनीपरिषदः समुद्घाटनं समजनि। अस्मिन्नेव सन्दर्भे नवागतानां प्राचार्याणाम् आचार्याणां सुदेशकुमारशर्ममहोदयानां स्वागतमपि ससन्तोषमकारि। अस्मिन् सन्दर्भे व्याकरण-विभागाध्यक्षः प्रो. प्रकाशचन्द्रः, शिक्षाशास्त्रविभागाध्यक्षः प्रो. मदनमोहनझाश्च समुपस्थितौ आस्तां सभायाम्। सभासञ्चालनं डॉ. कुमारः अकरोत्।

## ७० तमस्वातन्त्र्योत्सवस्य पाक्षिककार्यक्रमः ०८.०८.२०१६ तः २३.०८.२०१६ यावत्

राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृतविद्यापीठपरिसरे मुख्यालयस्य निर्देशानुसारं ७० तमस्य स्वातन्त्र्योत्सवस्य पाक्षिककार्यक्रमः अगस्तमासस्य ०८ दिनाङ्कतः २४ पर्यन्तं समाचरितः। तदङ्गतया छात्राणां कृते अनेकाः स्पर्धाः समायोजिताः।

०८.०८.२०१६ - छात्राणां कृते वाक्प्रतियोगिता - तत्र स्नातक-स्नातकोत्तरस्तरद्वये स्पर्धा सञ्चालिता। अनेके छात्राः सोत्साहं भागग्रहणं कृतवन्तः।

०९.०८.२०१६ - संस्कृत-हिन्दी-मराठी-आङ्ग्लभाषासु निबन्धलेखनस्पर्धा समायोजिता।

१२.०८.२०१६ - शोभायात्रा समायोजिता। परिसरीय सर्वेऽपि छात्रास्तत्र संस्कृतभाषया स्वातन्त्र्योत्सवसम्बद्धानि संस्कृतसम्बद्धानि च घोषणवाक्यानि घोषयन्तः आत्मानं धन्यं कृतवन्तः।

१६.०८.२०१६ - परिसरे छात्राणां कृते योगासनस्पर्धा एवं विभिन्नक्रीडास्पर्धाश्च समायोजिताः। तत्र बहवः छात्राः भागग्रहणमकार्षुः। विशेषतया योगासनस्पर्धा, बालकबालिकयोः कृते पृथक् चतुरङ्गस्पर्धा च आसीत्।




शोभायात्रायाः एकं दृश्यम्

१७.०८.२०१६ - सर्वेषां कृते रङ्गोलीप्रतियोगिता सञ्चालिता। तत्र प्रह्लादबेहेरा इति छात्रः सुन्दरतया रङ्गोलीं निर्मितवान्।

२२.०८.२०१६ - शिक्षाशास्त्रिच्छात्राः स्वातन्त्र्योत्सवदिवसमुपलक्ष्य अनेकेषां स्वातन्त्र्यसङ्ग्रामनायकानां विषयं स्वीकृत्य वीथीनाटकं परिसराद्बहिर्गमनमार्गे प्रदर्शितवन्तः।

२३.०८.२०१६ - परिसरस्य सर्वे अध्यापकाः छात्राश्च मुम्बईनगरस्य विविधराष्ट्रप्रसिद्धस्थानानां सन्दर्शनं परिभ्रमणं कार्यक्रमस्याङ्गतया कृतवन्तः।

२४.०८.२०१६ - अनेके छात्राः राष्ट्रियनायकानां विविधराज्यानां च वेषभूषणं धृत्वा छद्मवेषकार्यक्रमे भागमूढवन्तः।

इत्थं विविधैः कार्यक्रमैः विशिष्टः कार्यक्रमोऽयं परिसरे समायोजि।

## संस्कृतसप्ताहः

राष्ट्रियसंस्कृतसंस्थानस्य क.जे. सोमैयासंस्कृतविद्यापीठपरिसरे प्रतिवर्षमिव अस्मिन् वर्षेऽपि संस्कृतसप्ताहम् उपलक्ष्य दिनत्रयात्मकः संस्कृतसप्ताहमहोत्सवः अगस्तमासस्य १७, १८, १९ दिनाङ्केषु समाचरितः।

संस्कृतसप्ताहसमारोहस्य उद्घाटनकार्यक्रमः अगस्टमासस्य १७ दिनाङ्के जातः। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण प्रो. प्रियतमचन्द्रशास्त्रिमहाभागः, अध्यक्षः परिसरप्राचार्यः प्रो.



संस्कृतसप्ताहोत्सवोद्घाटनकार्यक्रमस्य दृश्यम्

सुदेशकुमारशर्ममहोदयः, एवं कार्यक्रमसंयोजकः व्याकरणविभागाध्यक्षः प्रो. प्रकाशचन्द्रवर्यश्च उपस्थाय दीपप्रज्वलनमकार्षुः। तदनु प्रो. प्रकाशचन्द्रवर्यः अतिथीनां स्वागतं फलपुष्पादिप्रदानपूर्वकमकरोत्। अनन्तरं मञ्चस्थाः ज्येष्ठाः सर्वे संस्कृतमुद्दिश्य भाषणमकुर्वन्। अन्ते साहित्यशास्त्रविभागाध्यक्षः प्रो. राजन् ई. एम्. महोदयः धन्यवादं प्राकटयत्। कार्यक्रमस्य सञ्चालनं साहित्याध्यापकः डॉ. राकेशकुमारजैनः अकरोत्।

संस्कृतसाप्ताहिककार्यक्रमस्य द्वितीयदिने १८ दिनाङ्के श्रावणपूर्णिमाशुभावसरे विश्वसंस्कृतदिवसे संस्कृतकविसम्मेलनम् अपराह्णे २.०० वादने समायोजितम्। तत्र आचार्यः प्रियतमचन्द्रशास्त्रिवर्यः अध्यक्षपदमलङ्कृत्य स्वीयकवितां "संस्कृतममृतम्" श्रावयित्वा सर्वान् उदबोधयत्। अस्मिन्नवसरे विशेषतः कवयः डॉ. राजेन्द्रभावे, डॉ. के. महेशः, प्रो. ई. एम्. राजन्, डॉ. ई. आर्. नारायणन्, डॉ. स्वर्गकुमारमिश्रः, डॉ. एम्. सुदर्शनचिळूणकरः, डॉ. राकेशकुमारजैनः, डॉ. कुमारः इत्यादयः स्वीयकविताः श्रावितवन्तः। सभाकार्यक्रमे स्वागतभाषणं डॉ. राकेशकुमारजैनः अकरोत्। डॉ. स्वर्गकुमारमिश्रः सर्वेषां कृते धन्यवादं समर्पितवान्। अस्य सम्मेलनस्य दायित्वं स्वीकृत्य डॉ. ई. आर्. नारायणन् सञ्चालनमकार्षीत्।

तृतीयदिवसे प्रातः १० वादनतः अपराह्णे १२.०० वादनपर्यन्तं भगवद्गीतायाः कालिदास- विरचित - रघुवंशमहाकाव्यस्य द्वितीयसर्गस्थश्लोकानां च कण्ठपाठस्पर्धा समायोजिता। अत्र विद्यापीठीयच्छात्राः बाह्यविद्यालयच्छात्राश्च भागमगृह्णन्। एवञ्च भाषणप्रतियोगितायाः आयोजनं छात्राणां कृते संस्कृताध्ययनस्य व्यावसायिकावसराः इति विषये कृतमासीत्। अपराह्णे २.०० वादने समापनसमारोहः समजनि। तत्र मुख्यातिथिरूपेण सुश्री चन्दना मण्डलमहाभागा, उपायुक्ता, केन्द्रीयविद्यालयसङ्गठनम्, मुम्बईक्षेत्रम्, समागता। अस्मिन्नवसरे परिसरच्छात्राः वैदिकमङ्गलाचरणम्, सरस्वतीवन्दनम्, स्वागतगीतम्, कुलगीतञ्च प्रास्तुवन्। विशेषतया शुभावसरेऽस्मिन् द्वयोः संस्कृतपण्डितयोः सम्मानमासीत्। परिसरप्राचार्यः प्रो. सुदेशकुमारशर्ममहोदयः आचार्यः प्रियतमचन्द्रशास्त्री एवं आचार्यः व्यासप्रसादपाण्डेयः इत्यनयोः प्रशस्तिपत्रं राङ्कवं फलपुष्पाणि च दत्वा सममानयत्।

सम्माननं स्वीकृत्य द्वावपि स्वीयं भाषणमकुरुताम्। मुख्यातिथिः हिन्दीभाषया संस्कृतस्य माहात्म्यं वर्णयित्वा छात्रान्नुदबोधयत्। अन्तिमचरणे स्पर्धाविजेतृभ्यः पुरस्कारवितरणं कृतम्। कार्यक्रमममुं साहित्यविभागस्याध्यापकः डॉ. सुदर्शनचिपळूणकरः समचालयत्। त्रिदिवसीयसंस्कृतसप्ताहमहोत्सवस्य समापनं व्याकरणाचार्यस्य प्रो. बोधकुमारझावर्यस्य धन्यावादभाषणेन सह शान्तिमन्त्रेण सुसम्पन्नम्।



शिक्षकदिवसे आचार्यं सम्मानयन् छात्रः

## शिक्षकदिवसः

अस्मिन् वर्षे विशेषतः छात्राः सितम्बरमासस्य ५ दिनाङ्के सोमवासरे श्रीगणेशचतुर्थी - उत्सवः वर्तते इत्यतः डॉ. सर्वेपल्लि राधाकृष्णन् महोदयस्य जन्मदिवसमुपलक्ष्य शिक्षक- दिवससमारोहं सितम्बरमासस्य २ दिनाङ्के समाचरितवन्तः। एतस्मिन् कार्यक्रमे मुख्यातिथिः व्याकरणविभागाध्यक्षः प्रो. प्रकाशचन्द्रः, विशिष्टातिथिः शिक्षाशास्त्रविभागीयवरिष्ठप्राध्यापकः डॉ. देवदत्तसरोदे, शिक्षाशास्त्रविभागाध्यक्षः प्रो. मदनमोहनझावर्यः अध्यक्षश्च आसीत्। कार्यक्रमस्य सञ्चालनम् आयुष्मान् भावेशपाठकः अकरोत्।




विश्वविद्यालयानुदानायोगसमितेः निरीक्षणस्य एकं दृश्यम्

## विश्वविद्यालयानुदानायोगसमितेः निरीक्षणम्

विश्वविद्यालयानुदानायोगेन प्रेषिताः निरीक्षणसमितेः सदस्याः प्रो. पङ्कजजानीमहोदयस्य नेतृत्वे पञ्चसंख्याकाः सितम्बरमासस्य ०८ दिनाङ्के अस्मत्परिसरं प्राप्य सर्वविधनिरीक्षणमकार्षुः। तस्मिन् सन्दर्भे सर्वविधसिद्धताभिः साकं सांस्कृतिककार्यक्रमः, PPT प्रदर्शनम्, अध्यापकैः सह छात्रैः सह च संवादः इत्यादयः अनेके कार्यक्रमाः समायोजिष्यत। १० दिनाङ्के प्रातः ते ससम्माननं निर्गताः।

## हिन्दीपखवाडा

मुम्बईपरिसरे प्रतिवर्षमिव अस्मिन् वर्षेऽपि सितम्बरमासस्य १४ दिनाङ्कात् २८ दिनाङ्कं यावत् "हिन्दीपखवाडा" इति हिन्दीदिवसमुपलक्ष्य हिन्दीविभागास्य पाक्षिककार्यक्रमः समाचरितः।

**उद्घाटनकार्यक्रमः** – १४ दिनाङ्कस्य अपराह्णे ३.०० वादने हिन्दीपखवाडा कार्यक्रमस्य उद्घाटनसमारोहः आयोजितः। एतस्मिन् कार्यक्रमे मुख्यातिथिरूपेण मुम्बईस्थ-एम्. एम्. पी. एस्.




हिन्दीपखवाडाकार्यक्रमस्य दृश्यम्

कला एवं वाणिज्यमहाविद्यालयस्य हिन्दीविभागाध्यक्षा डॉ. उषामिश्रमहाभागा समागत्य हिन्दीभाषाध्ययनेन महान्तोऽवसरा उद्योगस्य सन्तीत्यतः युवकाः प्रयासं कुर्युरिति समभाषत। कार्यक्रमेऽस्मिन् अध्यक्षः व्याकरणविभागाध्यक्षः प्रो. प्रकाशचन्द्रवर्यः विशिष्टातिथिः शिक्षाशास्त्रविभागाध्यक्षः प्रो. मदनमोहनझाश्च आसीत्। कार्यक्रमस्य सञ्चालनं हिन्दीविभागस्याध्यापिका डॉ. गीतदूबे कृतवती। कार्यक्रमोऽयं ज्योतिषशास्त्राध्यापकस्य डॉ. सुभाषचन्द्रमिश्रस्य स्वागतभाषणेन समारभ्य डॉ. अनिरुद्धनारायणशुक्लस्य धन्यवादज्ञापनेन समाप्तिमगात्।

**विशिष्टव्याख्यानम्** – हिन्दीपखवाडाकार्यक्रमस्य अङ्गतया सितम्बरमासस्य १९ दिनाङ्के विशिष्टव्याख्यानं समायोजितमासीत्। तत्र लखनऊपरिसरस्य निवृत्तप्राचार्यः प्रो. उमारमणझा एवं जयपुरपरिसरे शिक्षाविभागीयाचार्यः प्रो. फतेहसिंहः इत्येतौ विशिष्टव्याख्यातृरूपेण उपस्थाय हिन्दीभाषामहत्वं वर्णयित्वा व्याख्यानं कृतवन्तौ। अस्मिन् कार्यक्रमे परिसर- प्राचार्यः प्रो. एस्. के. शर्ममहोदयः अध्यक्षः आसीत्। सञ्चालनं संयोजिका डॉ. गीतादूबे कृतवती।

**विविधप्रतियोगिताः समापनसमारोहश्च** – २८ दिनाङ्कस्य पूर्वाह्ने १०.३० वादनतः छात्राणां कृते हिन्दीकाव्यपाठप्रतियोगिता समायोजिता यस्यां बहवः छात्राः सोत्साहं भागमगृह्णन्। तत्र तेषां कृते पुरस्काराश्च घोषिताः। अपराह्ने ३.०० वादने हिन्दीपखवाडाकार्यक्रमस्य समापनसमारोहः आयोजितः। तस्मिन् कार्यक्रमे हिन्दीभाषाविशारदाः आचार्याः रामजी तिवारीमहोदयाः मुख्यातिथिरूपेणोपस्थाय हिन्दीभाषायाः अध्ययनं विदेशेषु कथं प्रचलति, तस्यावश्यकता च केत्यादिविषयमवलम्ब्य सम्यगभाषत। विशिष्टातिथिरूपेण समुपस्थितः अस्मत्परिसरीयसाहित्यविभागाध्यक्षः प्रो. ई. एम्. राजन्-महोदयः दाक्षिणात्यराज्येषु हिन्दीभाषायाः स्थितिमवर्णयत्। कार्यक्रमाध्यक्षः प्राचार्यः प्रो. एस्. के. शर्ममहोदयः समीक्षणेन साकं हिन्दीसंस्कृतेर्वर्णनमकरोत्। डॉ. देवदत्तसरोदे-महोदयः धन्यवादमाविष्कृतवान्। कार्यक्रमसंयोजिका डॉ. गीतादूबे सम्पूर्णस्यास्य सञ्चालनमकरोत्।

## श्रीसदाशिवपरिसरवार्ता



स्वच्छताकार्यक्रमे निरताः परिसरीयाः

### स्वच्छभारतकार्यक्रमः

जुलैमासे सत्रारम्भो जातः। छात्राणां विविधकक्षासु प्रवेशानन्तरम् अगष्टमासस्य प्रथमसप्ताहे प्रथमकार्यक्रमोऽयं स्वच्छताविषयकः अभवत्। प्राचार्याणामाचार्य-सि.एच्. नागवरप्रसादरावमहोदयानामाध्यक्षे क्रीडाध्यापकस्य श्रीमतः प्रियजित्महापात्रमहोदयस्य मार्गदर्शने परिसरीयाः छात्राः सम्पूर्णपरिसरं स्वच्छमयमकुर्वन्। यावच्छक्यं लघुवृक्षरोपणमपि कृतवन्तः।

### संस्कृतसप्ताहोत्सवः

प्रतिवर्षमिव संवत्सरेऽस्मिन्नपि श्रावणपूर्णिमावसरे संस्कृतदिवसमुपलक्ष्य संस्कृतसप्ताहोत्सवः १६.०८.२०१६ तः २२.०८.२०१६ दिनाङ्कं यावत् श्रीसदाशिवपरिसरे संस्कृतभाषाया भारतीयसंस्कृतेश्च समग्रे विश्वे लोकप्रियतां कारयितुं महता उल्लासेन समनुष्ठितः।

१६.०८.२०१६ दिनाङ्के उद्घाटनोत्सवः श्रीसदाशिवपरिसरस्य प्राक्तनप्राचार्यवर्याणां प्रो. विन्ध्येश्वरीप्रसादहिमांशुमहोदयानां मुख्यातिथित्वे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य न्यायविभागाध्यक्षाणां प्रो. कमलेशमिश्रमहोदयानां मुख्यवक्तृत्वे, परिसरस्यैव धर्मशास्त्रविभागाध्यक्षाणां प्रो. अतुलकुमारनन्दमहोदयानां सम्मानितातिथित्वे, अस्यैव परिसरस्य व्याकरणविभागाध्यक्षाणां प्रो. हरेकृष्णमहापात्रमहोदयानां सारस्वतातिथित्वे, पण्डितप्रवराणां श्रीसञ्जयपण्डामहोदयानां, पण्डितप्रवराणां श्रीपर्शुरामपण्डामहोदयानाञ्च सम्मानिताचार्यत्वे, प्राचार्यवर्याणां प्रो. नागवरप्रसाद-रावचण्ड्रपाटिमहोदयानामाध्यक्षे, अस्यैव परिसरस्य न्यायविभागाध्यक्षाणां डॉ. महाशझामहोदयानां संचालकत्वे, डॉ. गणपतिशुक्लमहोदयानां संयोजकत्वे सर्वेषां परिश्रमेण महतोत्साहेन सुसम्पन्नः। अन्येऽपि परिसरीयाः बहिस्थाः विद्वांसः छात्राश्च सभायां समुपस्थिताः आसन्। अवसरेऽस्मिन् प्राचार्यैः पण्डितप्रवरेभ्यः राष्ट्रपतिसम्मानितेभ्यः श्रीसञ्जयपण्डामहोदयेभ्यः, पण्डितप्रवरेभ्यः राष्ट्रपतिसम्मानितेभ्यः श्रीपर्शुरामपण्डामहोदयेभ्यश्च संस्कृतसेवार्थं राङ्कववस्त्रसम्मानपुरस्सरं मानपत्रं प्रदत्तवन्तः। समागतातिथिवर्यैः प्राचार्यैश्च संस्कृतस्य वर्तमानसन्दर्भे किं प्रयोजनमिति विषये उपदेशात्मकं व्याख्यानं प्रदत्तम्। अन्ते स्वीयधन्यवादज्ञापनेन दर्शनविभागाध्यक्षाः प्रो. गौरप्रियादाश-महोदयाः सभामरञ्जयन्। शान्तिपाठेन संस्कृतसप्ताहोत्सवोद्घाटनसभा समाप्ता।

१७.०८.२०१६ दिनाङ्कादारभ्य १८.०८.२०१६ दिनाङ्कं यावत् संस्कृतभाषणस्पर्धा, संस्कृतनिबन्धलेखनस्पर्धा, श्लोकान्त्याक्षरी-स्पर्धा, स्तोत्रकण्ठपाठस्पर्धा इत्यादिस्पर्धाः संस्कृतसप्ताहोत्सवाङ्गभूताः आयोजिताः। तत्र विभिन्नासु शास्त्रीयस्पर्धास्वनेके छात्राः सोत्साहं भागमगृह्णन्। तासु स्पर्धासु बहवः छात्राः विजेतारो व्यद्योतन्त।

### हिन्दी-पखवाडाकार्यक्रमः

परिसरे हिन्दी-पखवाडाकार्यक्रमः सम्भ्रमेण समाचरितः। अस्मिन् कार्यक्रमे छात्राणां कृते निबन्ध-भाषण-स्वरचितकविता-वाचनादिप्रतियोगिताः आयोजिताः। कार्यालयीयकर्मचारिणां कृते कार्यालयीय-पत्रलेखनादिप्रतियोगिताः आयोजिताः। उद्यापनसमारोहे विजेतृणां छात्राणां सम्माननं जातम्। किञ्च उद्यापनसमारोहे शिक्षाशास्त्रविभागस्य आचार्याः डॉ. विजयपालकछवाहमहोदयाः मुख्यातिथिरूपेण उपस्थाय हिन्दीभाषयाः संस्कृतभाषोपयोगित्वविषये अभाषन्त। कार्यक्रममुं हिन्दीविभागाध्यापिका डॉ. श्रीमती केतकीमहापात्रमहाभागा सुष्ठु सञ्चालितवती।

### राष्ट्रियसंगोष्ठी

सितम्बरमासस्य १५ दिनाङ्कादारभ्य १७ दिनाङ्कं यावत् इन्दिरागान्धिराष्ट्रियकलाकेन्द्रस्य राष्ट्रियपाण्डुलिपिमिशन्सरस्वतीअनुसंधान-संस्थायोः मिलितानुकूल्येन श्रीसदाशिवपरिसरे "भारतीयमातृकासम्पदं प्रति उत्कलीयदार्शनिकपरम्परायाः अवदानम्" इति विषयमधिकृत्य राष्ट्रियसंगोष्ठी आयोजिता। अस्यां राष्ट्रियसंगोष्ठ्यां सम्मानितातिथित्वेन श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्व-विद्यालयस्य कुलपतिचराः आचार्याः श्रीधरवशिष्ठमहोदयाः उपस्थिताः। मुख्यवक्तृरूपेण चेन्नई विश्वविद्यालयस्य दर्शनविभागस्य आचार्याः गोदावरीशमिश्रमहाभागाः कुञ्चिकाभाषणं दत्तवन्तः। उद्यापनसत्रे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः आचार्याः गङ्गाधर-पण्डामहोदयाः मुख्यातिथिरूपेण समागमन्। भारतस्य विविधप्रदेशेभ्यः विशिष्टाः विद्वांसः भागमुद्व्वा स्वकीयं सारगर्भितं शोधपत्रं प्रास्तुवन्। परिसरस्य प्राचार्याः डॉ. सि. एच्. नागवरप्रसादरावमहाभागाः आध्यक्ष्यं निरवहन्। सरस्वतीसंस्थायाः मुख्यसचिवाः डॉ. सदानन्ददीक्षितमहोदयाः राष्ट्रियपाण्डुलिपिमिशन् इति संस्थायाः सदस्याः डॉ. दिलीपकरमहोदयाश्च राष्ट्रियसंगोष्ठ्याः संयोजनं कृतवन्तः। परिसरस्य सर्वेऽपि आचार्याः अध्यापकाश्च अस्यां संगोष्ठ्यां भागमगृह्णन्।

सितम्बरमासस्य ३० दिनाङ्के प्राचार्याणां आचार्य सि.एच्.नागवरप्रसादरावमहोदयानां सौप्रस्थानिकमुत्सवे परिसरस्य सर्वे विभागाध्यापकाः आचार्याः अध्यापकाश्च तेषां सम्माननं कृतवन्तः।


## राष्ट्रियसंस्कृतसंस्थानम्


(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए-श्रेण्यां' प्रत्यायितः,
भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

**५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८**
**दूरवाणी - ०११-२८५२३६११**
**website : www.sanskrit.nic.in**

### संस्कृताध्ययनाय पत्राचारपाठ्यक्रमः - २०१६-१७

नवदेहलीस्थ राष्ट्रियसंस्कृतसंस्थानेन पत्राचारमाध्यमेन स्वस्थाने एव स्थित्व सुगमतया संस्कृताध्ययनार्थं द्विवर्षीयसंस्कृतपाठ्यक्रमः प्रचाल्यते। एकस्य वर्षस्य पाठ्यक्रमशुल्कः २५०/- भारतीयानागरिकानां कृते, ५० यू.एस. डॉलर वैदेशिकनागरिकाणां कृते विद्यते। शुल्कं ड्राफ्ट द्वारा कुलसचिवः राष्ट्रियसंस्कृतसंस्थानं, ५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८ अत्र प्रेषयितुं शक्यते। शुल्कप्राप्त्यनन्तरं पञ्जीकरणपश्चात् पाठ्यसामग्री अध्येतृणां कृते पोस्ट द्वारा प्रेष्यते। विशेषविवरणार्थं राष्ट्रियसंस्कृतसंस्थानस्य अन्तर्जालं www.sanskrit.nic.in दृष्टुं शक्यते। ड्राफ्ट तथा पत्ररूपेण आवेदनं अस्मिन् सङ्केते प्रेषयितुं शक्यते - प्रभारी, पत्राचारपाठ्यक्रमानुभागः, राष्ट्रियसंस्कृतसंस्थानम्, ५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८ दूरवाणीसंख्या - ०११-२८५२१९९४ एक्स्टेंशन सं. २३७, २५२।

# विशिष्टसंस्कृतसेवाव्रतिसम्मानः 2016



## डॉ. चन्द्रगुप्तश्रीधरवर्णेकरः

डॉ. चन्द्रगुप्तश्रीधरवर्णेकरमहाभागस्य जन्म 28 दिसम्बर 1947तमे वर्षे महाराष्ट्रराज्यस्य नागपुरे अभवत्। महोदयस्य अध्ययनं तान्त्रिकक्षेत्रे समवर्तत। यद्यपि संस्कृतक्षेत्रे असौ आदौ अध्ययनं न प्रावर्तयत् तथापि महोदयस्य अवदानं संस्कृतक्षेत्रे श्लाघ्यं विद्यते। 1967तमे वर्षे नागपुरविश्वविद्यालयात् तान्त्रिकविषये विशिष्टश्रेण्यां स्नातकपदवीं समार्जयत्। ततः 1970तमे वर्षे आई.आई.टि.कानपुरतः तान्त्रिकक्षेत्रे विशिष्टश्रेण्यां स्नातकोत्तरोपाधिं समाप्नोत्। 1978तमे वर्षे सङ्गणकविज्ञाने बेङ्गलूरुस्थ-आई.आई.एस.सि द्वारा सङ्गणक-विज्ञानक्षेत्रव्यापकतायै संस्कृतसंरचनायाः विशेषता (Related the Importance of Sanskrit Constructs to wider fields of Computers Science) विषये शोधोपाधिं प्राप्नोत्। शोधक्षेत्रे अध्यापनक्षेत्रे च 39वर्षाणां महान् अनुभवः महोदयस्य विद्यते। संस्कृतज्ञानस्य वैश्विकोपयोगाय नैकेषां तन्त्रांशानां (Softwares) विकासमकरोत्। एवं देवनागर्याः विविधलिपिविन्यासमपि निरमात्। अस्य 500 अधिकशोधपत्राणि संस्कृते प्रकाशितानि सन्ति। सङ्गणकीयं संस्कृतम् इति विषये संसाधकरूपेण असकृत् उपन्यासो विहितः। बहुषु संघेषु समितिषु च कार्यदर्शिरूपेण महोदयेन कार्यं व्यधायि। सर्वदा संस्कृतोन्नयनाय बद्धदीक्षोयं सङ्गणकमाध्यमेन संस्कृतश्रियं विवर्धयितुं यतते। नूनमस्य प्रयत्नः श्लाघ्यः नम्यश्च अस्ति।

---



## प्रो. बि. महादेवन्

प्रो. बि. महादेवन्-महोदयः प्रबन्धनविषयस्य अध्येता विद्यते। अधुना केरलराज्यस्य वेलियनाडुस्थ-चिन्मयविश्वविद्यापीठम् इति विश्वविद्यालयस्य कुलपतिपदे विराजते। 1985तमे वर्षे अभियान्त्रिकविषये स्नातकपदवीं मद्रास-विश्वविद्यालयात् प्राप्नोत्। अथ च अभियान्त्रिकविषये स्नातकोत्तरोपाधिं 1987तमे वर्षे, प्रौद्योगिकप्रबन्धनम् (Industrial Management) इति विषये शोधोपाधिं 1991तमे वर्षे च आई.आई.टि. मद्रासतः समार्जयत्। अस्य अध्यापनक्षेत्रे शोधक्षेत्रे च 25वर्षाणाम् अनुभवः अस्ति। 2005तमे वर्षे ई.आई.यु.तः व्यवसायविषये उत्तमः आचार्यः (Business Professor) इत्यनेन सम्मानितः अस्ति। अस्य 300अधिकानि शोधपत्राणि राष्ट्रियान्ताराष्ट्रियपत्रिकासु प्रकाशितानि सन्ति। नैकासाम् अन्ताराष्ट्रिय-शोधपत्रिकाणां समीक्षासमितौ कार्यम् अकरोत्। अस्य संस्कृतभाषाविषये महान् आदरः विद्यते। आपञ्चविंशतिवर्षेभ्यः संस्कृतभाषाविषये भारतीयसंस्कृतिविषये च कार्यं विदधानः अस्ति। न केवलं भारते किन्तु पाश्चात्यदेशेष्वपि संस्कृतप्रचारं विधत्ते। अपि च संस्कृतभारतीट्रस्टइत्यस्याः संस्थायाः आध्यक्ष्यं व्यदधात्। प्रौद्योगिकक्षेत्रे प्रबन्धनक्षेत्रे च संस्कृतस्य प्रचाराय यतते। अस्य महोदयस्य संस्कृतोपासना प्रशंसनीया अनुकरणीया च विद्यते।

---



## डॉ. धवलकुमारपटेलः (आई.ए.एस.)

डॉ. धवलकुमारपटेलः भारतीय-लोकसेवा-आयोगे(IAS) विद्यमानः असौ गुजरातदेशे जिलाधीशकार्यं विदधानः अस्ति। एवं पूनास्थ-वैद्यकीयमहाविद्यालयात् वैद्यकीयोपाधिमपि प्राप्तवान्। 2008तमस्य वर्षस्य लोकसेवायोगपरीक्षायां 12स्थानं प्राप्नोत्। संस्कृतभाषाविषये अतीवगौरवम् अस्य विद्यते। संस्कृतानुरागी अयं संस्कृतभाषायाः प्रचारे प्रसारे च बद्धादरः अस्ति। अयं http://www.sanskritworld.in/ इति स्वकीये जालपुटे नैकानि संस्कृतपुस्तकानि समगृह्णात्। अस्मिन् जालपुटे सहस्राधिकानां (वेदाः, संहिता, उपनिषद्, पुराणानि, महाभारतम्, भगवद्गीता, वेदाङ्गानि, स्तोत्राणि, काव्यानि, नाटकानि, व्याकरणम्, अर्थशास्त्रम्, शब्दकोशः, वेदान्तः, ज्योतिषम्, आयुर्वेदः) इत्यादिविषयाणां पुस्तकानि उपलभ्यन्ते। अपि च व्याकरणशास्त्रसंबद्धानां संधिः, समासः, तिङन्तः इत्यादिविषयाणां साधनानि (Tools) महोदयेन निर्मितानि सन्ति। संस्कृताध्येतॄणां छात्राणां कृते निर्मितं समासविषयकं कार्यं अधिकम् उपकारकं विद्यते। संस्कृतमातुः सेवायै निरतः महोदयः अन्यानपि प्रेरयति। संस्कृतगृह्यः संस्कृतसेवाव्रती असौ स्तुत्यः अभिनन्दनीयः च।

## परीक्षा विभाग

# अंकसुधार हेतु विशेष अवसर

राष्ट्रिय संस्कृत संस्थान के भूतपूर्व छात्रों को सूचित किया जाता है कि जिन छात्रों ने सन् १९९० से २०१४ तक संस्थान द्वारा आयोजित शास्त्री/आचार्य की परीक्षाओं में ५० प्रतिशत से कम अंक प्राप्त किए हैं, ऐसे छात्रों को प्राप्तांक में सुधार करने का विशेष अवसर सक्षम अधिकारी द्वारा दिया गया है। अतः ऐसे भूतपूर्व छात्र जो अंक सुधार के लिए संस्थान की परीक्षा देना चाहते हों वे अपना आवेदन पत्र भरकर रुपये २५००/- (ढाई हजार) शुल्क डिमांड ड्राफ्ट अथवा नगद अधोलिखित विवरण के अनुसार जमा कर सकते हैं। आवेदन पत्र संस्थान के वेबसाइट www.sanskrit.nic.in से निकाल सकते हैं।

आवेदन पत्र जमा करने की अन्तिम तिथि - ३० नवम्बर २०१६ तक परीक्षा नियंत्रक, राष्ट्रिय संस्कृत संस्थान, ५६-५७ इन्स्टीटूयूशनल एरिया, (डी-ब्लाक) जनकपुरी, नई दिल्ली-११००५८ को प्राप्त हो जाना चाहिए।

परीक्षा तिथि - अप्रेल/मई २०१७ सम्भावित। (संस्थान की वेबसाइट पर अलग से दी जाएगी)

**नियमः-**

इस परीक्षा में केवल वही भूतपूर्व छात्र अंक सुधार के लिए आवेदन कर सकते हैं, जो सन् १९९० से २०१४ के मध्य संस्थान की परीक्षा उत्तीर्ण कर चुके हैं और शास्त्री अथवा आचार्य कक्षा में ५० प्रतिशत से कम अंक प्राप्त किये है।

इस विशेष परीक्षा का शुल्क रुपये २५००/- (ढाई हजार) है। नगद संस्थान मुख्यालय में अथवा डिमांड ड्राफ्ट कुलपति, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली के नाम देय होगा।

छात्र केवल अन्तिम वर्ष की पूरी परीक्षा अथवा कुछ पत्रों की परीक्षा दे सकते हैं।

इस विशेष परीक्षा का पाठ्यक्रम वार्षिक परीक्षा पाठ्यक्रम जो २०१६-१७ के लिए निर्धारित है, वही होगा एवं उसी के आधार पर परीक्षा होगी।

सत्रार्द्ध परीक्षा के छात्र जो सत्रार्द्ध परीक्षा देना चाहेंगे वे केवल शास्त्री षष्ठ अथवा आचार्य चतुर्थ सत्रार्द्ध के वर्तमान में संचालित पाठयक्रमानुसार ही परीक्षा दे सकते हैं।

इस विशेष परीक्षा के पाठ्यक्रम के लिए कोई अध्यापन की व्यवस्था संस्थान द्वारा नहीं की जाएगी।

इस परीक्षा के लिए नीचे दिये गये परीक्षा केन्द्र ही निर्धारित हैं। विशेष परिस्थिति में बदलाव संभव है।

**विशेषः-** (१) जिस विषय/शास्त्र में छात्र ने शास्त्री/आचार्य उत्तीर्ण किया है, उसी विषय/शास्त्र में छात्र अंक सुधार परीक्षा दे सकता है।

(२) आवेदन पत्र केवल परीक्षा नियंत्रक, राष्ट्रिय संस्कृत संस्थान, ५६-५७ इन्स्टीटूयूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ के कार्यालय में ही जमा होगा।

**नोटः-** विशेष जानकारी के लिए सम्पर्क किया जा सकता हैः-

सम्पर्क सूत्रः- ०११-२८५२१२५८/२८५२४९९३/२८५२४९९५, एक्सटैंशनः-२३२/२३३/२०६

वेबसाइट- www.sanskrit.nic.in ई-मेल- rsksexam@yahoo.com

**परीक्षा विभाग**

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.VIII Issue Nos.33 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007